EXERCISES

IN

Sanskrit Grammar & Translation

WITH

HINTS ON SOLUTIONS

BY

M. P. Oka, and G. K. Modak,

Sanskrit Teachers, New English School,

POONA

SECOND EDITION

COPIES 3000

Sole Agents :—

Messrs. G. Ramchandra & Co.,

Book-sellers and Publishers,

Budhwar Peth, POONA CITY.

1921.

Price Rupee 1.

Introduction.

This publication is intended for the use of the students preparing themselves in Sanskrit for the Matriculation Examination. After the student has mastered some such course as Dr. Bhandarkar's two books as also some such book as V. S. Apte's Guide treating of Sanskrit syntax and idiom, and has read properly arranged lessons in Sanskrit prose and verse so as to secure a fair hold of the idiom and syntax of the Sanskrit language,—all which may be expected to be accomplished in the time between the commencement of Standard IV and the end of the first term of Standard VII,–the second term of the latter may very profitably be utilized in a systematic answering of the exercises in this book, one by one, in the class, in the presence and with the help of the teacher. The exercises are so many models of the sort of examination papers in Sanskrit contemplated by the present university regulation as they are understood by the authors of this compilation, and understood rightly, I find myself inclined to add. This sort of polishing to all work previously done in grammar and idiom is, as a matter of fact, felt necessary and practised in some fashion or other in every school where Sanskrit teaching is done with any tolerable efficiency ; and to that end, often times University papers for previous years are taken up at random and solved in the class. But these papers are unsuitable for the intended purpose in two ways. In the first place, University papers for different periods answer to varying standards of Sanskrit scholarship and to varying requirements as to the nature of the preparation in the subject on the part of the Matriculation candidate, and therefore the papers for past years are ill-calculated to supply adequate guidance for preparation to meet

the existing requirements. Secondly, questions will be found to repeat themselves far too often in the University papers for the latter to form a series characterized by enough variety. The compilation before us is obviously free from these draw-backs and, getting the boys systematically to answer these exercises one by one in order, will afford a drilling of the most useful sort, serving to fix thoroughly in the students' mind a large range of important facts affecting the inflections, syntax and idiom of the Sanskrit language. Passages for translation from Sanskrit into English and *vice versa*, occurring in these exercises, are very judiciously selected from various sources and represent a variety of styles, and questions in grammar are quite as varied and searching as they ought to be, and are no where too obscure or out-of-the-way. Many of these questions are, however, so recondite that an average Sanskrit teacher may here and there find himself at a loss for the right answer and the ordinary student much more so. In order to help these, the authors of this book have appended notes at the end, answering the more difficult questions in the exercises. The exercises are fifty in number, amply sufficient for a term, and are further supplemented by a good number of miscellaneous questions. I have, therefore, great pleasure in recommending the use of this book in our High Schools especially during the latter term of the Matriculation class, and I trust that the time spent on this book will be found to have been quite usefully spent so far as Sanskrit work is concerned.

25th September, 1917.

K. N. Dravid.

Preface to the Second Edition.

The whole of the first edition of 2000 copies has been sold up in a little over three years, a fact that speaks highly of the usefulness of the book and of its appreciation by the teachers and students alike; for which the authors take this opportunity of recording their deep sense of gratitude.

In the interval, the curriculum of Sanskrit for the School-leaving Certificate Examination underwent certain modifications, in response to which the book has been thoroughly revised and alterations introduced, and the necessary sanction of the Government for the same obtained.

The price of the book has been increased, with the Government sanction, from annas 14 to 16, – a very modest increase in the face of the abnormally high prices of paper and rates of wages in the market.

We conclude with a strong hope that this edition will receive at the hands of the public the same patrongae as its predecessor did.

POONA.
13th March, 1921.

Authors.

EXERCISES

IN

SANSKRIT GRAMMAR AND TRANSLATION.

(50 GROUPS.)

Group I.

I. Translate into English:— (22)

राजन् । उदके गते सेतुबन्ध इव सर्वथा निष्फलोऽयं तव विलापः । यदि तु युधिष्ठिरं च पुत्रांश्च पुरैव द्यूतान्न्यवर्तयिष्यस्तदा नेदं व्यसनं त्वामाव्राजिष्यत् । युद्धकाले पुनः प्राप्तेऽपि यदि सकलान् संरब्धानात्मजान् सम्यगबोधयिष्यस्तदापि नेमां विपदमन्वभविष्यः । वध्यतामयमविधेयो दुरात्मा दुर्योधन इति चेदचोदयिष्यः समन्तान् कौरवांस्तन्नूनं पर्यहरिष्य इमां महतीं हानिम् । पितृधर्ममनुस्मरन् पुत्रांश्चेत् सत्पथे संस्थाप्य न्याय्यं पन्थानमाश्रयिष्यस्तदा नायमिदानीं प्रसज्यमानो वैषम्यदोषस्त्वामस्प्रक्ष्यत् । प्रत्युत परमपूज्योऽभविष्यः पाण्डवानां पाञ्चालानां वृष्णीनामन्येषां च नराधिपानाम् । धिक् त्वां यः किल लोके प्राज्ञतमः सन् बुद्धिव्यभिचारात् सनातनं धर्मं हित्वा दुर्योधनस्य च कर्णस्य च शकुनेश्च मतमन्वगाः ।

II. (*a*) Write grammatical and explanatory notes on the words underlined in the above passage. (3)

(*b*) Write a note on the proper use of the Conditional (लृङ्) (3)

(*c*) Use compounds for:—

(१) माता च पिता च (२) वध्वा सह (३) समानः पतिर्यस्याः सा (४) बिडालश्च मूषकश्च (3)

III. Give :—Pres. 3rd per. plu. of ब्रू, सञ्ज् with व्याति, ग्रह्; Imperative 2nd Per. Sing. of नियुज्, धा, हा Pass., रभ् Caus.; Perf. 3rd per. plu. of त्रस्, ध्यै, आस्. (7)

IV. (*a*) Give—Loc. Sing. of पति, असृज्, पूर्वोत्तरा. Nom. plu. of स्वसृ, दशन् + अहन् (compound), प्रथम. (4)

(*b*) Give the Past Pass. Parti. of:—पच् , प्याय्, सह् with वि, ज्ञा Caus., आप् Desi. (3)

V. Translate into English:— (10)

किं धावसि प्रिये नून दृष्टासि कमलेक्षणे ।
वृक्षैराच्छाद्य चात्मानं किं मां न प्रतिभाषसे ॥ १ ॥
अवगच्छामि ते शीलं परिहासप्रियं प्रिये ।
विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते ॥ २ ॥
यैः परिक्रीडसे सीते विश्वस्तैर्मृगपोतकैः ।
एते हीनास्त्वया सौम्ये ध्यायन्त्यस्राविलेक्षणाः ॥ ३ ॥
मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुम् ।
क गच्छसि वरारोहे मा मोत्सृज सुमध्यमे ॥ ४ ॥

VI. (*a*) Dissolve and name the Compounds :—

विषयान्तरम्, प्राह्णः, वर्षभोग्यः, प्रत्यक्षम्, द्विगुः. (6)

(*b*) Give the feminines of :—

बहु, पुत्र, श्वशुर, रक्षक, कर्मकर, शुश्रुवस्, आचार्य (5)

VII. (*a*) Name fully the forms underlined in the following:—

सुचिरं बभ्रमुर्षा विश्रमं लिप्सुरिहास्तां भवती । मा तपः साधु नीनशः । वायुर्दिशो व्यानशे । ईजुषोर्वो शुभं भूयात् । आमयश्च रिपुश्चापि वत्स्यन्तौ हि समौ मतौ । तेन दिनान्यनायिषत । (5)

(*b*) Substitute corresponding forms of the Imperfect; for:—

अरोदिषुः, अघुक्षः, अवारिष्टाम्, अभान्त्स्म (3)

VIII. Translate into Sanskrit— (26)

(1) His library consists for the most part of dramatic works and contains only three or four historical volumes.

(2) Nearly eighty girls were married last year.

(8) A certain traveller bought eight cakes for a *Pana*, and he ate six of them without being satisfied, but his hunger was satisfied by eating the seventh. Then the block-head exclaimed, " I have been cheated; why did I not eat this cake which has allayed the pangs of hunger, first of all ? Why did I waste those others, why did I not store them up ? "

Group II.

I. Translate into English:— (18)

आकृत्येव प्रकृत्यापि वक्रा मन्थरा धात्र्योदितं वचनमाकर्ण्य, जरा रूपसंपदमिव रामस्य श्रियं विरुन्धाना, प्रासादात् क्षिप्रमवरुह्य, सुखसुप्तां कैकेयीं चोपगम्य, क्रोधेन दह्यमानेव समुत्तेजनक्षमैर्वाक्शल्यैरेवमतुदत् ।

उत्तिष्ठ मूढे शयनं जहाहि भयं महद् घोरमुपस्थितं त्वाम् ।
उपप्लुतं दुःखशतैः सुखार्हा नात्मानमद्याप्यवबुध्यसे त्वम् ॥ १ ॥
मय्येव रक्तो वचसि स्थितो मे पतिः सदैवेति वृथा किमर्थम् ।
विकत्थसे मानिनि मन्दबुद्धे धूर्तेन राज्ञा बत वञ्चितासि ॥ २ ॥
नित्यमेत्य तव मन्दिरं पतिः सस्मितं च मधुरं च भाषते ।
त्वं च चाटुवचनैः प्रतारिता शुद्धभाव इति वेत्स्यमुं शठम् ॥ ३ ॥

II. (*a*) Re-write the following making such changes as will suit the directions given:— (7)

(1) उत्तिष्ठ मूढे शयनं जहाहि (Change the voice.)
(2) शुद्धभाव इति वेत्स्यमुं शठम् (Remove the word इति)
(3) अयं ग्रन्थो न मे रोचते (Make अहं the subject)
(4) शिष्या वेदानध्यैष्ट (Caus. Pass. with गुरुणा as the agent)
(5) ग्रामं जिगमिषुः पितरं प्रणमति (Use a primitive participle for जिगमिषुः)

(*b*) Give the optional forms for the following:—

जहाहि, वेत्सि, मूढे, उपगम्य, जाग्रति and वर्षीयसी (3)

III. (*a*) Dissolve and name the compounds:—

मासपूर्वा, पूर्वोत्तरा, त्र्यहजाता, अनुगङ्गम् and आसन्नवेग. (6)

(*b*) Give:—Loc. Sing. of अदस् *fem.*, पति, श्री. Accu. Sing. of श्री, एतद् *m.*, अन्यतम *Neu.* Instru. Plu. of सम्राज्, अहन्, दधृष्. (2)

IV. Translate into Sanskrit:— (8)

1 It is better to dwell in the midst of alarms than reign in this horrible place.

2 Thank God that thou art again seen by me after a long separation.

3 From high words they come to blows.

V. (*a.*) Translate into English:— (16)

कदाचित् सर्वे ब्राह्मणा जयार्थिनः समुच्छ्रितकुशध्वजाः क्षत्रियवरानमितौजसो हैहयानभ्ययुः । तदा वैश्याश्च शूद्राश्च हैहयपराभवकाम्यया ब्राह्मणैः सहैककार्या असन् । एवमेकतस्त्रयो वर्णा एकतश्च क्षत्रिया इति सर्वेऽपि युद्धप्रसक्ता अभूवन् । अथ बहुलबला अपि त्रयो वर्णा युद्धेषु पुनः पुनरभज्यन्त क्षत्रियाश्चाल्पसंख्या अपि विजयमवाप्नुवन् । एवंभूते व्यतिकरे कश्चिद् द्विजसत्तमो धर्मात्मानं क्षत्रियवरेण्यमेकमप्राक्षीत् ' किमत्र निदानम् ' इति । सोऽप्येवं पृष्टो याथातथ्यमब्रवीत् ।

वयमेकस्य शृणुमो महाबुद्धिमतो रणे ।
भवन्तस्तु पृथक् सर्वे स्वबुद्धिवशवर्तिनः ॥ १ ॥

(*b*) Give idiomatic expressions in English or Marathi for:—

(१) किं मिष्टमन्नं खरसूकराणाम् (२) अभिगतस्तवाहमस्मि (३) खलः सर्षपमात्राणि परच्छिद्राणि पश्यति । आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥ (४) तिले तालं पश्यति (५) कलहाय बद्धपरिकरः । (6)

VI. (*a*) Give:—Pres. 3rd Per. Plu. of शी, हु, वृध् Des. Imperative 2nd Per. Sing. of अश्, शद्, स्मि Caus. Perf. 3rd Per. Sing. of खन्, त्रप्, धे. Simple Future 3rd Per. Sing. of ग्रह्, नृत्, दा Pass. (6)

(*b*) Give:--Past Pass. Parti. of , अद्, व्ये, क्षै, आप् Desi. Infinitives of सह्, सृज्, ह्री Caus., विधा Desi. Ind. Past Parti. of ग्रह्, बन्ध्, नम् with प्र Sanskrit equivalents for–54th, nearly 80, twice a week. Fem. bases of शूद्र, भवत्, यवन and यव with their meanings. (8)

(c) What forms are the following ? :-

अरौत्सुः, अतथाः, अजुहावत्, ज्ञेयासुः, वर्धिषीष्ट, पिपासुः, जघ्र, अताप्सम्. (4)

VII. Translate into Sanskrit:—

In this extremity the beaten followers of the captive king fled for help to the Pandavas. For the sake of the honour of the family, and particularly for the protection of the ladies of their house, Arjuna and Bhima with the twins came, by the magnanimous command of Yudhisthira, to the rescue of their kinsmen, and after performing marvellous feats of war obtained the release of the crest-fallen Duryodhana, whose bitterness against his cousins was only increased by this humiliating and never-to-be-forgotten incident.

Group III.

I. Translate into English:— (25)

अस्ति रत्नवत्यां नाम नगर्यां वीरवर्मा नाम भूपालः । दुर्निवारभुजप्रतापनिर्जितारातेस्तस्य ललनाजनमण्डनायमाना विलासवती नाम रमणी बभूव । अनयोश्च दम्पत्योरनपत्यतया दूयमानयोरतिक्रान्तप्राये यौवने दैववशात्तनयो जज्ञे । संमदविकसिताननो वीरवर्मा कुमारस्यास्य कमलानन्द इति नाम चकार । पञ्चषमासदेशीये कुमारे दुर्भाग्यवशाद्राजा च राजमहिषी च युगपदेव केनापि दुर्निवारेणामयेनाक्रान्तौ कालवशमुपजग्मतुः । गच्छता च कालेन नियन्तुरभावात् सर्वेऽपि सचिवादयः स्वस्वविषये स्वातन्त्र्यमवलम्बिरे । अस्वामिकमिव चाभूदशेषं राष्ट्रम् । सर्वोऽपि स्वस्यैव प्रभुत्वमवस्थापयितुं प्रायतत । एवं गते कीटको-

कीर्णनिःसारवंशवद्नायासोद्ध्वंसनीयमिव तद्राष्ट्रमभूत् । अवसरे चास्मिन् प्रबलतमा रन्ध्रान्वेषिणो रिपवः सपद्यभिपत्य महीयसा सैन्येन रत्नवतीं परिरुरुधुः । अशेषं च तद्राष्ट्रमात्मसाच्चक्रुः ।

II. (*a*) Dissolve and name the compounds underlined in the above passage. (6)

(*b*) Give:— (15)

Loc. Sing. of सखि, सेनानी and क्रोष्टु. Acc. Plu. of इदम् *fem.*, यकृत and चक्रणवस्. Nom. Plu. of पूषन्, पथिन् and जरा. Voc. Sing. of मातृ and सुभ्रू *fem.*

III. Translate into Sanskrit:— (10)

1 In the 54th chapter of the 6th volume, there are 348 verses.

2 As long as life endures, you must strive, with all heart, to accomplish your desired object.

3 Instead of studying, he spends his time in playing.

4 It is far better to support one's self by begging from door to door than to be always fawning upon the haughty rich.

IV. Translate into English:— (15)

हनूमान् (आत्मगतम्):—

यदर्थमयमारम्भस्तत्कार्यमवसादितम् ।
मया हि दहता लङ्कां न सीता परिरक्षिता ॥ १ ॥
मया खलु तदेवेदं रोषदोषात्प्रदर्शितम् ।
प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम् ॥ २ ॥
अथ वा चारुसर्वाङ्गी रक्षिता स्वेन तेजसा ।
न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥ ३ ॥
न हि धर्मात्मनस्तस्य भार्याममिततेजसः ।
स्वचारित्र्याभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥ ४ ॥
तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि ।
असौ विनिर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥ ५ ॥

V. Give:— (19)

Pres. 3rd Per. Plu. of हु, लू, कृ with अप. Imperative 2nd Per. Sing. of चक्ष् Pass., श्रु Desi., स्मि Caus. Simple Future 3rd Per. Sing. of गुह्, ली Pass., गम् with सम्. Cond. 2nd Per. Plu. of स्था, बुध् 4 A, हन् Pass. Past Pass. Parti. of इन्ध्, रभ् with प्र + आ, कृत्, दा with आ. Ind. Past. Parti. of गण् with वि, गै, वस् with प्र. Comp. degree of युवन्, क्षुद्र, सु, विद्वस्. Abs. nouns from कृश, पटु and रमणीय Collective nouns from युवति, स्त्री, वात.

VI. Name fully the forms underlined in the following:— (5)

तां सभामुपेयुषा बुभुक्षुणा न केनाप्यनाशुषा प्रत्यगामि न वार्थमीप्सता वसु नालम्भि। शिष्यान् वेदं माधिजीगपः। रक्षांसि वेदीं परितो निरास्थत्.

VII. Translate into Sanskrit:— (18)

"It is true, my child," he said to Yudhisthira, "it is in vain that you look for victory while I lead the Kuru hosts; and neither may you hope to slay me while I hold my weapons and fight for life, yet there are certain things before which I lay down my arms. Note them well. Before those who are afraid, those who are weak from wounds or illness, those who have surrendered to my mercy, and any who were born woman I will not fight. If you attack me to-morrow from behind one such, you will achieve my death."

Group IV.

I. Translate into English:— (25)

अहो महामोहान्धकतास्माकं ये किल कयापि दुर्लभप्रबोधया कालनिद्रयेवाकुलीक्रियमाणाः परैः प्रबोधिता अपि स्वीयसदनवर्तिनामपि वस्तूनामस्तित्वं नावबुध्यामहे। एतेनैव किल प्रस्वापमहाव्याधिना समभिभूयमानानामस्माकं चूर्णपेषं पिष्टाऽभ्युदयनिःश्रेयसयोः साधनं धर्मः, समूलनाशं नष्टाः संपदाः, ऊर्ध्वशोषं शुष्काणि क्रियाजालानि, ग्रीष्मसरिद्विलायं विलीनः प्रोत्साहः, समूलकाषं च कषि-

तानि शिल्पानि । किमधिकम् । दुर्भाग्यदूनेनेवामुना प्रस्तावेन समाक्रान्ताः के वयं कुतो वयं केषां वयं किमारम्भा वयं कोऽस्माकं स्वीयः कः परकीयः किमभ्युदयामहे किं वा रसातलमेव प्रविशामः किमार्यवंशीया वयमुताहो बर्बरजातीया इत्यादिकमपि नावबोद्धुं प्रभवामः । अहो परा काष्ठास्माकं दुर्भाग्यस्य । कियन्ति वा सुरनगरसमानाकाराणि नागतानि नामशेषत्वमस्मद्देशीयानि नगराणि । कियन्तो वा न धूलिसाद्भूता अभ्रंकषा अस्मदीयवीरभूपानां जयस्तंभाः । कियन्ति च नोद्ध्वस्तानि नयनविलोभनानि मन्दिराणि देवानाम् । कियन्ति च न स्मरणीयां दशामापन्नानि मूर्तिमन्तीव पूर्वकालबलानि परैर्दुर्भेद्यानि दुरारोहाणि च दुर्गाणि । यन्नाम किंचिद्विलीनं विलीनमेव तदपुनर्भवाय । यत्त्विदानीमशतोऽप्यवशिष्टं तस्यापि तावत्करालकालवदनकुहरं प्रविशतः संरक्षणाय यदि नाभ्यर्थ्येत प्रयासो नाम तदा किं वा फलं विशुद्धतम आर्यवंशे समधिगतस्य जन्मनोऽस्माकम् ।

II. (*a*) Name and dissolve the compounds:— (5)

जातमृतः, अधिज्यधन्वा, त्र्यहे, अकुतोभयः, शूर्पणखा.

(*b*) Use compounds for:— (7)

(१) राज्यस्य धुः, (२) कुत्सितो राजा (३) महद्यशो यस्य सः (४) नृणां वरः (५) द्यौश्च पृथिवी च

(*c*) write a note on the use of numerals. Give examples. (3)

III. (*a*) Change the voice of the following:— (6)

(१) ते मां कथामश्रावयन् (२) वयं त्वामाहूयैवमब्रूम (३) स्वामी सूदेनौदनं पाचयामास (४) गुरुणा शिष्याः पुस्तकानि ग्राहिताः

(*b*) What grammatical forms are the following ?:—
जाग्रन्ति, स्य, परुषः, यति, निरास्थः (4)

IV. (*a*) Give: — (9)

Nom. Plu. of **पूषन्**, अल्प *m.*, **सखि**, **अन्यतम** *m.*

Accu. Sing. of **द्यो**, **इतर** *n*, **महत्** *m*, **स्त्री**.

Dative Sing. of **भू**, **शुचि** *n*, **दोस्**.

Gen. dual of श्वन्, क्रोष्टु.
Loc. Sing. of अदस् *f*., अस्थि, ययी, सायाह्न.

(*b*) Give the comparative degree of:— (4)
द्रुतम्, क्षिप्र, वृद्धा, दोग्धृ, श्रेयस् and किम्.

V. (*a*) Use the bracketed words in their proper forms:–(5)
(१) प्रजा (राजन्) नाभिद्रुह्येयुः (२) (ग्राम) पूर्वेण शैलो वर्तते (३) नार्यो (भर्तृ अनुरक्ताः सन्ति (४) नमस्कुर्महे (नृसिंह) (५) क इव (पाप) न जुगुप्सेत. (५)

(*b*) Use single words for the following:—
(१) अतिथिषु साधुः (२) सुमित्राया अपत्यं पुमान् (३) धर्मादनपेतम् (४) स्त्रीणां समूहः (५) जेतुं शक्यम्.

VI. Give:—

Imperative and Aorist 2nd Per. Sing. of हा, हन्, बन्ध्, द्युत्.
Perfect 3rd Per. Sing. of त्रप्, व्यथ्, वे.
Simple Future 1st Per. Sing. of भ्रस्ज्, ह्वे Pass., ऋ Caus.
Imperfect 3rd Per. Plu. of स्वञ्ज with परि, ऋध् Desi., पा Caus., दरिद्रा Pass.

VII. Translate into Sanskrit:— (17)

Some merchants went to a sovereign and exhibited for sale several very fine horses. The king admired them and bought them. Moreover, he gave the merchants a lac of rupees to purchase more horses for him. One day the king ordered his minister, in a sportive manner, to make a list of all the fools in his dominions. The minister did so and put His Majesty's name at the top. The king asked, "Why?" "Because you entrusted a lac of rupees to men whom you do not know and who will never come back," was the reply. "Ay! but suppose they should come back," "Then I shall erase your name and insert theirs."

Group V.

I. Translate into English:— (20)

(*a*) आसीत्काचिदभिजनवती बहुश्रुता राजन्या विदुला नाम। तदीयस्तनयः सञ्जयः कदाचित्सिन्धुराजेनाभिपत्य विनिरजायि। तदा दीनचेतसमात्मजं क्षात्रधर्मरता दीर्घदर्शिनी जननी प्रावोचत्। पुत्र नूनं न मां नन्दयसि मन्नन्दनोऽपि। हर्षवर्धनोऽसि खलु द्विषतां संजातः। मन्ये न त्वं मत्तो न वा पितुरपि जन्म प्रत्यपद्यथा य एवमपौरुषस्तिष्ठसि। यस्य मन्युर्नास्ति यस्य वा निर्वीर्यं साधनं बाह्वादिकं तं त्वादृशं तुच्छत्वान्न गणयन्त्यरातयः। एवं चेदुदास्यते त्वया न शक्यते यावज्जीवं प्रतिष्ठामुपगन्तुम्। तदुत्तिष्ठ। मैवं शेष्व पराजितः। मात्मानमवमन्यस्व। मा भैषीः। धेहि मनः कल्याणे वर्त्मनि। कथं ते मानोऽपि नामास्तमुपगतः। अथ वा साध्विदमुच्यते। 'सुसतोषः कापुरुषः स्वल्पकेनापि तुष्यति' इति।

(*b*) अवसरेऽस्मिन्पयोदपटलप्रावृततया गगनस्य सर्वतः सूचिभेद्यं तमः प्रससार। वितेनुर्भुवनभीषणं स्तनितमम्भोदाः। अन्तरान्तरा च दुर्जनसंपदमिवानुकुर्वाणा व्यद्योतत क्षणदृष्टनष्टा विद्युत्। सातत्येन च प्रावृतद्वृष्टिः। ववौ च सावेगं चण्डतमः पवनः। निपुणमपि पिहितेषु भवनद्वारेषु व्याकुलीचकार स्तेन इवाविदितमेवान्तःप्रविष्टः शिशिराशिशिरः समीरो मध्येगृहं प्रसुप्तान् शैत्यातिशयेन। (10)

(*c*)

इयं संसृतिर्नाम कन्था विचित्रा
पटैः कल्पिता हर्षशोकादिरूपैः।
पुमान् सीवने सूत्रमस्या व्यधायि
तदाकर्षणं कुर्वती स्त्री च सूची ॥ १ ॥ (4)

II. (*a*) Dissolve and name the compounds underlined in I *a*, *b* and c. (5)

(*b*) Use compounds for the following :—

(१) द्वे अहनी जातस्य यस्य सः (२) समानो धर्मो येषां ते (३) न पन्थाः

(४) पञ्चानां तक्ष्णां समाहारः (6)

(c) Name fully the following forms—

क्षामः, क्षोदीयान्, आर्त, व्यधिथाः and व्यानशे.

III. (a) Give:—Aorist Pass. 3rd Per. Sing. of:—तन्, लिह्, धे, हन् and इ with अधि (Prim. and Caus.) (5)

(b) Give Caus. Pre. 3rd Per. Sing. of:—ह्री, स्फुर्, जि, भी, (3)

(c) Give Past Pass. Parti. of:—श्रि, शुष्, दिव् and अव्. (2)

(d) Give Gerunds from:—दा, पा, क्रम्, शी with सम्, न and व्यध् with अनु. (3)

(e) Give Poten. Pass. Parti. of:—शास्, भुज् and लू. (3)

IV. (a) Change the voice of the following:—

गुरुः शिष्यान् वेदमध्यापयेत् ।

कैकेयी दशरथेन रामं वनं गमयति स्म ।

केन त्वं साचिवः कृतः ।

(b) Correct where necessary:—

१ माघनामं पण्डितं लक्षरूपकान् ददौ भोजराजा ।

२ त्वयि च मयि च किमन्तरं यद्यावामुभयावपि पिता न स्निह्येत् ।

३ इदानीं सा कुत्र स्थिता भवितव्य । (4)

(c) Express in Sanskrit:—456; 72 verses in the 33rd chapter; At least ten times a day. (5)

(d) Give the Superlative degree of:—

महत्, वृद्ध, विद्वस् and दीर्घ. (3)

V. Translate into Sanskrit:—

(a) A country fellow had the fortune to take a hawk in the hot pursuit of a pigeon. The hawk pleaded for herself, that she never did the countryman any harm. " And therefore I hope " says she, " that you will do me none. " " Well " says the countryman, " and pray what wrong did the pigeon ever do you ? Now by the reason of your own argument you must even expect to be treated yourself, as you yourself would have treated this pigeon. " (18)

(*b*) The shade of a tree is the more refreshing to him that has been oppressed with heat. (3)

Group VI.

I. Translate into English:— (20)

(*a*) किं नु खल्वद्य राजा दीनो विषण्णः परिशुष्यता मुखेन कैकेय्या सह जोषमास्ते । अहह बाष्पपर्याकुलेक्षणतया न मामीक्षितुमपि शक्नोति । अन्यदा मामवलोक्य यः कुपितोऽपि प्रसीदति स किंस्विदद्यैव न प्रत्यभिनन्दति मां समुपस्थितम् । किंनिमित्तोऽयमस्य शोकः को वा हेतुर्मनःक्षोभस्य । इत्येवं बहुशो विचार्य रामो भयमिवापन्नः कैकेयीमभिवाद्य प्रोवाच । अम्ब । कुतोऽद्य मे तातः कुपितः । कस्मिन्वास्य वचसि मया न स्थितम् । कच्चिन्नापराद्धमज्ञानान्मयैतस्य । कच्चिन्न त्वयैवाभिमानादयं परुषं किंचिदुक्तो येनास्य मनो लुलितम् । अपूर्वोऽयं विकारोस्मिन् दृश्यते । नैनमतोषयन्मुहूर्तमपि जिजीविषेयम् ।

(*b*) हा राम हा रमण हा जगदेकवीर
हा नाथ हा रघुपते किमुपेक्षसे माम् ।
इत्थं विदेहतनयां मुहुरालपन्ती-
मादाय राक्षसपतिर्नभसा जगाम ॥ १ ॥ (5)

II. (*a*) Name fully the following forms:— (3)

आनक्षे, संविदाना, आर्पिपः, वत्स्यन्ती, and प्रजग्ध्य.
Parse the words underlined in I *a*
(*b*) Give the 3rd Pers. Sing. of the Perf. of:—हन्, ग्रह्, स्था with प्र and ह्वे (Prim. and Caus.) (7)

III. (*a*) State and illustrate the peculiarities of गन्ध, महत्, अहन् and अष्टन् as members of compounds. (6)
(*b*) Give the several steps which lead to the form धक्ष्यति. (3)

IV. Give Sing. and Plu. of the Gen. of **पति**, **श्री**, **कर्मयोग**, and the same of the loc. of **अर्हत्**, **अम्बु** and **भूरुह**. (4)

V. Translate into English:--

(*b*) अथ स भूपतिर्व्रजन्नग्रे चण्डांशुतापगलितैरमृतरश्मेर्द्रवैरिव स्वच्छशीतल-वारिभिः संभृतं सुमहत्सरोऽद्राक्षीत् । दिगन्तव्यापी तस्य विस्तारः । त्रैलोक्य-लक्ष्म्या स्वप्रतिबिम्बं द्रष्टुकामया मणिदर्पण इवासौ व्यधायि । सरसः पश्चिमे तीरे तेन भूभृता महान् दिव्यपादपो व्यलोकि । वातान्दोलिता विस्तारिण्यस्तस्य शाखा भुजा इवादृक्षत । मूर्धलग्ना चाभ्रावलिः स्वर्गङ्गेव शोभामपुषत् । एवं चासौ तरु-स्ताण्डवनृत्यपरः शंकर इव शुशुभे । अत्युन्नतेन व्योमपृष्ठावगाहिना शिरसा कौतु-कान्नन्दनवनशोभामवलोकयितुमिवोद्यतोऽभूत् ! दिव्यरसैः शाखावलम्बिभिश्च फलैः शोभमानः सुरानद्धैः पायूषकलशैरिवोपलाक्षितं कल्पपादपं विडम्बयामास । (20)

(*b*) निर्गुणोऽपि विमुखो न भूपतेर्दानशौण्डमनसः पुरोऽभवत् । (8)
वर्षुकस्य किमपः कृतोन्नतेरम्बुदस्य परिहार्यमूषरम् ॥ १ ॥
प्रेम सस्य न गुणेषु नाधिकं न स्म वेद न गुणान्तरं च सः ।
दित्सया तदपि पार्थिवोऽर्थिनं गुणवगुण्य इति न व्यजीगणत् ॥ २ ॥

VI. Rewrite the following, minding the several directions:- 8.

(*a*) **क्रोधाद् भवति संमोहः** (Use **संमोह** in the Dative).

(*b*) **दृष्टिर्निष्फलतां गता** (Avoid the use of the Abstract noun)

(*c*) **वसुमत्या हि नृपाः कलत्रिणः** (Use the first word in the Nominative).

(*b*) **मोहविलसितमेतद् यदुपरते सुहृदि प्राणाः परित्यज्यन्ते** (Use two compound words for the noun-clause).

(*e*) **यावत् संबन्धिनो न परापतन्ति तावदेव मालत्या गृहं गन्तव्यम्** (Use the Loc. Absolute construction for the Adverbial clause).

VII. Translate into Sanskrit:— (16)

Hail to thee, venerable one, the wishing-tree of thy worshippers. The earth is thy foot, the heaven is thy head, the cardinal points are thy ears, the sun and the moon are thy

eyes, the globe of the world is thy belly. Thou art hymned by the wise as the infinite soul. Though the world is thy form, thou art formless Though thou art the support of the world, thou art thyself without support. Who is there that knows thy real nature ?

Group VII.

I. Translate into English:— (25)

(*a*) अथ प्रभातायामेव शर्वर्यां स राजा तल्पमुज्झांचकार । सवधूकश्च यावत् प्रस्थातुमभिलषति तावदेव भगवान् कुमुदिनीनायको निशाथिन्यां पद्मिनीखण्डकान्तिर्नितान्तं लुण्ठितेति दिनकराद् बिभ्यदिव ध्वस्ततेजा अस्ताद्रिकुहरे प्रलीनः। विवस्वांश्च कृतागसममुं हन्तुकाम इव क्रोधादाताम्ररोचिः समजनि । तत्क्षणाच्चाकस्मादेव प्रादुरास कश्चिद् ब्रह्मराक्षसो विद्युत्पिङ्गशिरोरुहः कज्जलश्यामलः कालमेघाभः । स च पुरुषान्त्रमालाकृतोत्तंसः, केशयज्ञोपवीतभृत्, खादन्नरशिरोमांसं पिबन्नसृक् कपालेन, वमन्नग्निं मुखेन, दंष्ट्राकरालो विमुच्योच्चाट्टहासं राजानं तं भर्त्सयमान एवं जिजगाद ।

(*b*)

पुरा शरत्सूर्यमरीचिसंनिभान्
नवाग्रपुङ्खान् सुदृढान् नृपात्मजः ।
सृजत्यमोघान् विशिखान् वधाय ते
प्रदीयतां दाशरथाय मैथिली ॥ १ ॥

यावन्न सुघोरा महती दुर्धर्षा हरिवाहिनी ।
नावस्कन्दति नो लङ्कां तावत् सीता प्रदीयताम् ॥ २ ॥

न तु क्षमं वीर्यवता तेन धर्मानुवर्तिना ।
वैरं निरर्थकं कर्तुं दीयतामस्य मैथिली ॥ ३ ॥

II. (*a*) Name and dissolve the compounds underlined in Question I *a* and *b*. (6)

(*b*) Use compounds for the following:— (5)

(१) अहन्यहनि (२) चरमं रात्रेः (३) न पन्थाः (४) पञ्चमी भार्या यस्य सः

III. Give:—Nom. Plu. of अर्यमन्, वर्षाभू, बिभ्यत् *m* and *n*.

Acc. Plu. of असृज्, तुष्टुवस् *m*, इदम् *f*.
Abl. Sing of दाक्षिण *f*., गुरु *n*. भू.
Instru. Plu. of मित्रद्रुह्, पुर्, दधृष्.
Voc. Sing. of द्यो, धर्मबुध्, मातृ, विशत् *f*. (6)

IV Give:— (17

Pres. and Perf. 3rd Per. Plu. of इष्, भृ रुध्, स्मृ Pass., लभ् Caus. and दा Pass.

Imperfect 3rd Per. Plu. of धा, दृश्, शास्, गुह्, यज्, ऋ and इ with अनु.

Condi. 3rd Per. Sing. of गाह्, ध Pass., कॢप्, कृत्, संगम् and इ with अधि.

V. Change the voice of the following :— (10)

(१) द्रोणः पाण्डवान् धनुर्विद्यामध्यापिपत्
(२) तमहमन्वयं च नाम चाप्राक्षम्
(३) नियत्या शिवो भिक्षाटनं कारितः
(४) राजा सचिवेन ब्राह्मणेभ्यो गा दापयेत्

VI. Distinguish clearly between:— (6)

(१) अर्थी – अर्थवान् (२) जय्यः– जेयः (३) अगामि – अगमि
(४) सीमन्तः –सीमान्तः (५) शूद्रा – शूद्री (६) भीषयते –भाययान

VII. Translate into Sanskrit:— (25)

(*a*) In the dead of night Karna came to pay his homage to the dying general, and to ask forgiveness for any faults he might have committed. Bhishma freely forgave him, and advised him to transfer his allegiance to the Pandavas, but Karna nobly, faithful to the path of honour, rejected the suggestion as on many previous occasions.

(*b*) That fellow plumes himself upon his learning.

(*c*) No definite limit can be set to his fame.

(*d*) They did not deviate even an inch from the beaten path.

(*e*) You are a tool in the ministers' hands.

(*f*) Half a bread is better than no loaf.

(*g*) Matters took a different turn.

(*h*) A fool has his mind influenced by the convictions of others.

Group V II.

I. (*a*) Translate into English:— (30)

अथ यदुच्यते बलवत्त्वादेवाद्यते मांसमिति तदप्यसमञ्जसम्। न ह्ययं नियमे यन्मांसादनमन्तरेण शक्तिरेव न संपद्यत इति। सन्ति किल बहवो वीरा यैर्न स्वप्नेऽपि सेवितं मांसम्। तथा हि। केषां वा न विदितो यवनवनदावानलायमान-प्रताप आद्यो बाजिराजोऽस्मद्देशीयो वीराग्रणीर्धार्मिकप्रवरो विप्रः। केषां च न कर्णपथमागतो रिपुकरिकेसरी तस्यैवात्मजस्तत्समानप्रभावो रघुनाथः। केन वा न श्रुतो वीरयशःपटलवर्धनः पटवर्धनोऽभिनव इव परशुरामो वीरः परशुरामो नाम। को वा मांसाशनोऽपि प्रभावतस्तथाविधाननाघ्रातमांसगन्धानपि तुलयितुं प्रभवेत्। बहवश्च मांसरसमास्वादयन्तोऽपि नव्या अस्थिमात्रसारा दृश्यन्ते। तन्मांसाशना-भावेऽपि ससारत्वस्य मांसाशनेऽपि च निःसारत्वस्य प्रत्यक्षीभावेनान्वयव्यतिरेकव्य-भिचारान्न मांसं बलहेतुरिति सिद्धम्।

(*b*)

प्रेयो मित्रं बन्धुता वा समग्रा
सर्वे कामाः शेवधिर्जीवितं वा।
स्त्रीणां भर्ता धर्मदाराश्च पुंसा-
मित्यन्योन्यं वत्सयोर्ज्ञातमस्तु ॥ ॥

(c) गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥ १ ॥
विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥ १ ॥

II (a) Name and dissolve the compounds underlined in questson 1. (7)
(b) Quote or frame sentences illustrating the uses of:— रम् with वि, कच्चित्, ननु, किमुत and आत्मन् as a reflexive pronoun. (5)

III (a) Express in Sanskrit:— (8)

(1) 68 books were sold for 94 rupees.
(2) Girls are generally cleverer than boys.
(3) The 23rd boy in this class is the dullest of all.
(4) How many times a week do you see your mother?
(5) The higher we go, the purer is the atmosphere.

(b) Give four words which have different meanings in diffierent numbers. (4)

V. Give:— (8)

Nom. Plu. of प्रेमन्, अदस् *n.*, त्रितय *m.*, पूषन्.
Accu. dual of पृच्छत् *n.*, अहन्, सेदिवस् *n*, करिष्यत् *f.*
Instru. Plu. of आशिस्, पुंस्, युष्मद्, सक्थि.
Loc. Sing. of एतद् *f.*, द्वितीय *f.*, किमपि *m.*, ग्रामणी.

VI. Give:— (9)

Pres. 3rd Per. Plu. of हु, विद् all Conj. गुप्.
Imperfect 3rd Per. Plu. of ईश्, बृ, शास् (Act. & Pass.).
Imperative 2nd Per. Sing. of विजि, हा to go, दृश्.
Poten. 3rd Per. Sing. of क्री Caus., ह्वे Pass., ग्रह् Desi.
Simple Future 3rd Per. Sing. of वृध्, वृ, दा Pass.

VII. Give single words in Sanskrit for:—

(१) ग्रामे भवः (२) ग्रामाणां समूहः (३) ज्ञातुमिच्छन् (४) कलहं करोति (५) आचार्यस्य पत्नी (६) यवनानां लिपिः (७) हृदयस्य प्रियम् (८) नावा तार्यम् (९) ऊरू प्रमाणमस्य (१०) ईषदूनो विद्वान्:—

VIII. Translate into Sanskrit:— (19)

A traveller hired a donkey to convey him to a distant place. As it was very hot, the traveller stopped to rest and sought shelter under the shadow of the donkey. As this afforded protection for one and as the traveller and the owner of the donkey both claimed it, a violent dispute arose between them as to which of them had the better right to it. The quarrel proceeded from words to blows and while the men fought, the donkey galloped off.

In quarrelling about the shadow, we often lose the substance.

Group IX.

I. Translate into English:—

(*a*) कदाचिद्दक्षेण यष्टुकामेन शंकरवर्जं सर्वे जामातरो यज्ञसंदर्शनाय निमन्त्रिताः । भवानी तु ज्ञातिकुलसश्रया निजं भर्तारमनागतमवलोक्य पितरं पर्यप्राक्षीत् 'किमिति तात भर्ता मम नाहूतस्त्वया ' इति । दक्षः प्रत्यवोचत् । " बाले, कपालमाली कृत्तिवासास्ते भर्ता । अमङ्गलाभ्यासरतिः कथमसौ मखे मङ्गलेऽस्मिन्नाहूयताम् ", इति । इमां कर्णविषसूचिकामिव पितुर्गिरमुपश्रुत्य देवी दाक्षायणी " पापोऽयं मे जनकः किमस्माज्जातेन दग्धदेहेन मामामुना " इति संजातकोपा शरीरमग्निसादकरोत् । शंकरश्च वृत्तान्तमिमं ज्ञात्वा भार्यावियोगमन्युना दक्षाध्वरमनीनशत् प्राद्रवच्च सर्वान् [illegible] द्विजवरान् स्वश्वशुराविभ्रित्सित-यज्ञार्थं समागतान् । (20)

(*b*) रामः—(दशरथं प्रति)

कृतप्रियं त्वामनृतेन योजयन्
न कामये तात महीं न वा दिवम् ।
सुखेन वत्स्यामि वने वनेचरै—
र्व्यपैतु दुःखं तव मत्कृतेऽनघ ॥ २ ॥

फलानि मूलानि च भक्षयन्वने
गिरीन् प्रपश्यन्सरितः सरांसि च ।
लतोपगूढासु शिलासु संविशन्
सुखी भविष्यामि तवास्तु निर्वृतिः ॥ २ ॥ (8)

II. (*a*) Dissolve and designate the compounds underlined in I. *a* and *b*. (5)

(*b*) Name the following forms:–पेतुषि, संगसीरन्, अवेः and अन्ववात्त. (3)

(*c*) Frame sentences illustrating the use of:—दृश् Caus., दण्ड् Pass., भवितव्यम्, मा स्म, दक्षिणेन. (5)

III. Give:—Imperfect 3rd Per. Plu. of व्यध, हन्, हु.
Perf. 3rd Per. Plu. of भ्रम्, इ, स्वप्, हु, सद् with वि.
रम् Pass., कृ (Act. and Pass.).
Infinitive of Purpose from मस्ज्, तप्, तृ. Ind. Past.
Parti. of वस्, नम् with प्र, ली with वि, निविश् Caus.
Perf. Act. Parti. of दृश्, हन्, पृ. (10)

IV. Translate into English:— (15)

इह खलु विदुषा कर्म कर्तव्यमेव । स्थावरा ह्यकर्माणो जीवन्ति । नेतरे । तिर्यञ्चोऽपि कर्मणैव वृत्तिमाप्नुवन्ति । तस्माद्दैवपरो भूत्वा मा कर्म त्याक्षीः। कर्म कुर्वंश्च मा ग्लासीः । अर्थस्य प्राप्तौ कर्म कर्तव्यम् । प्राप्तस्य च रक्षणे विवृद्धौ चापि कर्मावश्यकमेव । 'भक्ष्यमाणो ह्यनादानात् क्षीयते हिमवानपि' । तस्माल्लब्धेनार्थेनैव न संतोष्टव्यम् । तस्य विवृद्ध्यर्थमपि यत्नः कर्तव्यः । यो हि दिष्टमुपासीनो निर्विचेष्टः सुखं शयीत स उदकस्य आमो घट इवावसीदेत्

अलक्ष्मीराविशत्येनं शयानमलसं नरम् ।
निःसंशयं फलं लब्ध्वा दक्षो भूतिमुपाश्नुते ॥ १ ॥

V. Re-write the following, making necessary corrections:—(6)

(१) अस्माद् गिरेरुत्तरेण महन्नदी वहतीति त्वन्मुखाद्द्यैवाश्रुणवम् ।

(२) धिक् तेषां ये दुर्भिक्षपीडितान् न दयन्ति स्वार्थं चैव केवलं स्पृहयन्ति ।

(३) मत्सखा रामचन्द्र अस्ति । तस्मान्न मह्यं कस्यापि भयं विद्यते । इति तेन मामुक्तम् ।

VI. Write a note on the formation of the feminine base from Present Participles. Illustrate your answer by examples. (5)

VII. Translate into Sanskrit:— (23)

The moon appeared in the midst of the firmament, curtained in clouds, which her beams gradually dispelled. Her light insensibly spread itself over the mountains of the island, and their peaks glistened with a silvered green. The winds were perfectly still. We heard along the woods, at the bottom of the valleys, and on the summits of the rocks, the weak cry and the soft murmurs of the birds, exulting, in the brightness of the night, and the serenity of the atmosphere.

Group X.

I. Translate into English:—

(*a*) कर्णः शरतल्पगतः शान्तनवमुपागम्य साश्रुकण्ठोऽब्रवीत् । महाबाहो ! राधेयोऽहम् । त्वां दिदृक्षुरागतोऽस्मि । नित्यमक्षिगतस्तवाहमासम् । इदानीं तु पश्य मां दयार्द्रया दृशेति । इदं वचनमाकर्ण्य कुरुवृद्धो वलीसंवृतलोचनः शनैरुद्वीक्ष्य पिता पुत्रमिव तमेकपाणिना परिरभ्य सस्नेहमुवाच । वत्स ! न त्वं राधेयो न चाधिरथस्ते पिता । कौन्तेयस्त्वं सूर्यज इति नारदान्मयाज्ञायि । न मे त्वयि द्वेषः । केवलं तव तेजसो वधो भवत्विति बहुशस्त्वां रूक्षाण्यश्रावयम् । एवं चेत् परुषं नावादिष्यं सर्वानपि पाण्डवांस्त्वमवधिष्यः । नीचाश्रयादीदृशी ते बुद्धिर्गुणिनामपि द्वेषिणी जाता । जानामि ते वीर्यं समरे शत्रुभिर्दुःसहम् । ब्रह्मण्योऽसि । शूरोऽसि ।

दाने च निस्तुलोऽसि । मा कुलभेदो भूयुष्माकम् । सोदर्यास्ते भ्रातरः पाण्डवाः । तदेतैः संगच्छस्व धार्तराष्ट्रैः सहितः । मदन्तं च भवतु वो वैरमिति ।

(*b*) हा वत्स लक्ष्मण । विकासय नेत्रपद्मे
मा गादिदं युगपदेव समस्तमस्तम् ।
भाग्यं दिवाकरकुलस्य च जीवितं च
रामस्य किं च नयनाञ्जनमूर्मिलायाः ॥ १ ॥

II. (*a*) Change the voice of:— (12)

(1) त्वां रूक्षाण्यश्रावयम्. (2) भक्षितगतस्तवाहमासम्.

(*b*) Write notes on:-दिदृक्षुः, सोदर्याः, धार्तराष्ट्राः and मा गात्.

(*c*) Express in Sanskrit:—68th chapter; the nearest town; pelted to death.

(*d*) Give:—Nom. Plu. of अर्ध *m.*, पूषन्, किञ्चित् *f.*, Dative Sing. of उत्तरपूर्वा, सानु, लघु *neu.*, Loc. Plu. of अदस् *f.*, गिर् and शुभ्रवस् *f.*

III. (*a*) Give Pres. 3rd Per. Sing. of विद् to know, आश, मन् and शास्, (*pass.*) Imperfect 3rd Per. Plu. of ध्मा, व्यध्, जक्ष् and श्लिष्. Simple Future 3rd Per. Sing. of ध्यै, वृ, बन्ध् and दृश् (*pass*). Past Pass. Parti. of वस्, त्रै, मस्ज्, इन्ध्, श्यै, हन् (*Caus*), वच् (*Desi.*). Gerund of नम्, पा, उत्त and दंश्. Perf. Parti. of गम् and तॄ. Feminine forms of पृच्छत्, शूद्र, भवत्, इन्द्र and युवन्.

(*b*) Give compounds in Sanskrit for:— (9)

Inside the village; a shady tree; five or six; dark as a cloud (6)

IV. Transla te into English:— 25

(*a*) कश्चिद् द्विजोत्तमः प्रतिग्रहेण द्वे गावौ प्राप । अथ कश्चिच्चोरस्तस्य ते गावौ दृष्ट्वा नेतुमचिन्तयत् । तत्कालं कोऽपि राक्षसस्तं द्विजं खादितुमैच्छत् । अथ तौ चोरराक्षसौ स्वं स्वमर्थं साधयितुकामौ निशि सममेव तद्भवने प्रापतुः । ततश्चोरो राक्षसस्य विदिताभिप्रायस्तं प्राह । अहमादौ धेनू हरामि । अयं हि द्विज इदानीं निद्रासुखं निर्विशति । त्वद्गृहीतः प्रबुध्येत चेत् कथं नु मया शक्यं भवेद् हरणमस्य गोयुगस्येति । राक्षसः प्रत्युवाच । नैवम् । अहं पूर्वं विप्रमप-

हरामि भक्षणाय । नो चेद्रोखुरशब्देन प्रबुद्धेऽस्मिन् परिश्रमो मे वैयर्थ्यमापद्येत । इत्येवं कलहायमानयोस्तयोः स द्विजः प्राबोधि कृपाणपाणिश्च तदनुधावनमकृत ।

(*b*) धमार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ १ ॥
कायः संनिहितापायः संपदः पदमापदाम् ।
समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् ॥ २ ॥

V. (*a*) Name and dissolve the compounds:— (5)

द्विजोत्तमः, धर्मार्थम्, दुःसहम्, मदन्तम्, and **मासमृतः.**

(b) What strikes you in **राक्षसस्य विदिताभिप्रायः** as regards the compound ?

VI. Translate into Sanskrit:—

(a) His mind being engrossed by these and the like perplexing thoughts, he passed a sleepless night.

(*b*) Tears had sprung to the eyes of Sita at the thought that they must be parted, but when she heard the reason, she recovered all her gaiety. Life in the forest had no terrors for her, the loss of a throne occasioned her no regret, if only she might follow her husband, and share his life and its hardships with him. And so at last it was arranged. Rama, Sita and Lakshmana presented themselves before Dasarath in full court, and there doing homage and saying farewell, they received from the hands of Kaikeyi the dress of ascetics and set out immediately for the life of exile in the forest.

Group XI.

I. (*a*) Translate into English:-- (18)

अस्ति हिमालयो नाम सकलभूधराणामधिराज इति प्रतीतः सुमहान् कोऽपि पर्वतः । यः किल नितान्तोन्नतत्वाद्घनस्पर्शानां, भव्यत्वात्काननश्रियः, द्राघिष्ठत्वादापगानां, परमविस्तृतत्वात्कन्दराणां, अत्युग्रत्वाद्धिंस्रपशूनां तथाभूतत्वाच्च तस्य तस्य वस्तुनः, गिरीन्द्र इति पदं सर्वथैवार्हति । यस्मिन्नद्रौ सुघोराश्च सुगहनाश्च

वनप्रदेशाः संदृश्यन्ते, शीतसद्भावसातत्यादौर्णवसनैरिव संवृतकाया निसर्गतो लोमशाविग्रहा वन्यसत्त्वाः संचरन्ति, स्वशरीररक्षणार्थं तानेव वन्यपशून् व्यापाद्य तेषां चर्मणैव वसनप्रावरणादितयोपयुक्तेन शीतबाधां विनिवारयन्तो मानवाश्च निवसन्ति ।

(*b*) दुष्टे देवि कैकेयि कुलपांसनि । राजानं वञ्चयित्वापि न तृप्तिं व्रजसि । कथं न्वतिक्रान्तमर्यादा सीतामपि विवासयितुमीहसे । नैव यास्यति वनं जानकी । प्रत्युतात्रैव निवसन्ती पत्युः प्रत्यागमनं यावत् तस्यैव पदमधिष्ठास्यति । 'आत्मा हि दाराः सर्वेषां दारसंग्रहवर्तिनाम्' । तदियं रामस्यात्मेति मेदिनीं पालयिष्यति । त्वन्निर्बन्धाद्गमिष्यति चेत्तदा मद्राद्याः सर्वेऽपि ब्राह्मणाश्च पौराश्चानुयास्यन्त्येनाम् । नैव स्थास्यन्तीहान्तपालाः । गमिष्यति राष्ट्रं सहोपजीव्यम् । सदारं राममेवोपस्थास्यन्ति सपरिच्छदा अमात्याः । किं बहुना । भरतोऽपि सशत्रुघ्नश्चीरवासा वने वसन्तमग्रजमेवानुवर्त्स्यसि । ततस्त्वमेवैका शून्यामिमां नगरीं पादपमात्रावशेषत्वादटवीभूतामिव यथाकामं प्रशाधि ।

न हि तद्भविता राष्ट्रं यत्र रामो न भूपतिः ।
तद्वनं भविता राष्ट्रं यत्र रामो निवत्स्यति ॥ १ ॥ (18)

(*c*) मन्ये कृतौ संसृतिवाङ्मयस्य भागौ विधात्रा गुणतो विविच्य ।
स्वारस्ययुक्ता कविता किल स्त्री पारुष्ययुक्तः पुरुषश्च गद्यम् ॥ १ ॥ (4)

II. (*a*) Dissolve and name the compounds underlined in I. (4)

(*b*) Use compounds for the following:— (5)

१ उन्नता नासिका यस्य सः २ द्वयोरञ्जल्योः समाहारः ३ सर्वमहः ४ युवतयो जाया येषां ते.

III. Give:—Nom. Sing. of एकतर *n.*, अनेहस्, जाग्रत् *m.*

Nom. Plu. of कति, अदस् *f.*, उभय *m.* & *f.*, अल्प *m.*

Accu. Plu. of स्त्री, दोस्, तितीर्वस् *m.* & *f.*

Instru. Sing. of इदम् *f.*, खलपू, तुष्टुवस् n.

Loc. Sing. of पति, सेनानी, सक्थि.

Voc. Sing. of सुभ्रू, अप्, अनडुह्. (6)

IV. (*a*) **Quote or frame sentences to illustrate the uses, of the** following words:—उत्सुक, आ, दक्षिणेन *ind.*, संक्रुध, अपराद्ध, दय्, अन्तरा, श्रु *Caus.* रञ्ज् with अप. (7)

(*b*) Give Feminines of बहुनामन्, जामातृ, तावक, कतिपय, तुदत्, रुद्र, कितव. (4)

V. (*a*) **Write down the Past. Pass. Parti. of** हा, संतन्, व्रश्च्, श्यै, धे, प्रदा, दिव्, भुज्, ग्रन्थ्.

(*b*) **Give Perf. Parti. from** जागृ, पृ, खन्, दंश्.
Pres. Parti. from आहन्, ह्री, छिद् and आस्.
Future Parti. from प्रवस्, नृत् and गाह्. (9)

IV. (*a*) **Translate into Sanskrit:—** (25)

A very terrible wind blew uprooting splendid trees, as if to shew that even thus in that place should heroes fall in fight; and the earth trembled as if anxious as to what all that could mean; and the hills cleft asunder, as if to give an opening for the terrified to escape; and the sky, rumbling awfully, though cloudless, seemed to say, ' ye heroes, guard guard, to the best of your power, this emperor of yours. '

(*b*) **Do unto others as you would be done by.**

(*c*) **In serving the wicked expect no reward and be thankful if you escape injury for your pains.**

Group XII.

I. (*a*) **Translate into English:—**

आसीद्दक्षिणापथे धर्मो नाम कोपि साधूनां धौरेयो माण्डलिको भूपतिः। तस्य भार्या चन्द्रवती नाम मालवदेशजा महाकुलोत्पन्ना वरस्त्रीमौलिमालिकाभूत्। तस्यां भार्यायां भूपतेस्तस्य लावण्यवती नाम यथार्थतां नाम्नो विदधती दुहितोदपद्यत। कदाचित्स राजा राष्ट्रभेदिभिर्दायादैर्मिलित्वा समुन्मूलितो भार्यासुतासहितो रात्रौ सद्रत्नसंचयमादाय राजधानीतः पलाय्य श्वशुरास्पदं मालवं प्रतिष्ठासुर्विन्ध्याटवीमाससाद। तत्र तु प्रविष्टस्य तस्य महीक्षितो दत्तानुयात्रेव रजनिरवश्या-

यशीकरैरुदश्रुभिरिव व्यतीताय समारुरोह च पूर्वाद्रिं 'मा गाश्चौराटवीमेताम्' इति तं वारयन्निव समुत्क्षिप्ताग्रकरो भगवान् भानुः। अथ स भूपतिः पादचारेणैव गच्छन् कुशकण्टकक्षतचरणयुगलः कृतान्तनगरीमिव परप्राणसर्वस्वहारिभिः पुरुषैरध्युषितां धार्मिकजनवर्जितां दुराधर्षां कामपि भिल्लपल्लिकां प्राप। (25)

(*b*) अथास्तमासेदुषि मन्दकान्तौ
पुण्यक्षयेणेव निधौ कलानाम्।
समाललम्बे रिपुमित्रकल्पैः
पद्मैः प्रहासः कुमुदैर्विषादः ॥ १ ॥ (5)

(*c*) दुरुत्तरे पङ्क इवान्धकारे
मग्नं जगत् संततरश्मिरज्जुः।
प्रनष्टमूर्तिप्रविभागमुद्यन्
प्रत्युज्जहारेव ततो विवस्वान् ॥ २ ॥ (5)

II. Translate into Sanskrit:—

A certain musician once gave great pleasure to a rich man by singing and playing before him. The rich man then called his treasurer, and said to him in the hearing of the musician; "Give this man a large sum of money." The treasurer said, "I will do so." and went out. Then the minstrel went to the treasurer, and asked him to pay down the large sum of money which had been promised. But the treasurer, who had been previously instructed by his master, refused to give him any thing. Then the musician went to the rich man himself and asked him for the money. But the rich man replied:—"What did you give me, that I should pay you a large sum of money? You gave a short-lived pleasure to my ears by playing on the lyre, and I gave a short-lived pleasure to your ears by promising you a gift of money." When the musician heard that, he did not know what answer to give; and went away. (30)

III. (*a*) Form adj., showing the possessor of the thing expressed, from each of the following:— (3)

मनस्, श्री, भास्, चक्षुस्, भूमि, मधु.

(*b*) Write grammatical and explanatory notes on the following:—

उन्मनीभूतः, कथंकारं भुङ्क्ते, देवानांप्रियः, मातुः स्मरति, राज्ञः पूजितः, सुकेशीभार्यः. (5)

IV. Give:—

(*a*) Imperfect 3rd per. sing. of any five roots ending in स्.

(*b*) Simple Future 3rd per. sing. of any five *Wet* roots endidg in इ.

(*c*) Pres. 3rd per. sing. of the Desi. of any five *Set* roots becoming *Wet* therein (8)

V. (*a*) Mention any three instances of ordinals declined like pronouns in any case. 2)

(*b*) Give any five words ending in न्, that are defective in the 1st five inflections. (2)

(*c*) Which roots form their Past Parti. by adding न ? Give examples. (3)

V1. (*a*) Translate the following into Sanskrit compounds, naming and dissolving them:--

One since whose death it is a month; three or four; one whose husband (भर्तृ) is living; one who has taken up his bow (धनुस्); less by one; afraid of death; taken up and thrown away. (6)

(*b*) Bring out the peculiar senses of the following:—

(*a*) मनोहृत्य पयः पिबति; (*b*) सुप्ताहं किल विललाप; (*c*) देवानांप्रियः; (*d*) चर्मणि द्वीपिनं हन्ति; (*e*) पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः । विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः ॥ (3)

(*c*) State the several senses and padas of वद् with various prepositions. (3)

Group XIII.

I. Translate into English:— (25)

ये किल श्रद्दधानाः कर्णे कुर्वन्त्युपजापान् कल्पनाकामिन्याः, ये वा समुपच्छन्दयन्तः सोत्कण्ठमिवानुधावन्ति दुराशापिशाचिकां, येषां वा द्रढीयान् विश्वासो यद्यूनां कामना वार्द्धके सफलीभवन्तीति, येषामीदृशी वा संभावना यथाद्य यन्न्यूनं तच्छ्वः परिपूर्णतां यास्यतीति तैरवश्यं श्रवणगोचरीकरणीय एष वृत्तान्तो रसालाख्यस्याब्सेनीयानां राजपुत्रस्य ।

आसीद्रसालो नाम तुरीयस्तनयो महाबलस्य कस्याप्यब्सेनीयानां भूपतेः । धन्यः खलु स विषयो यस्यायमीदृशः स्वामी परमविक्रमशाली यस्मादेव च पयोधिसंकाशो नीलाख्यो नदविशेषः समुद्भूय स्वकीयैर्जलैस्तांस्तान् प्रदेशान् प्लावयति स्वयमेव चोत्पादितया सस्यसंपदा सकलभुवनतलगतमानवजातस्य जठरकुहरपूरणे दत्तार्धसाहाय्य इव स्फुटं प्रकटयति परोपकारित्वमात्मनः ।

II (*a*) Join:–षद्न् + शेते + इति, भ्रस्ज् + तुम्, भ्रातुः + पुत्रः, अमी + ऋषयः; and give instances in which the final ह् of a base is changed to ढ्, घ्, भ्, and थ् respectively. (7)

(*b*) Dissolve and name the compounds:— (5)

त्रिचतुराः, यावच्छ्लोकम्, दध्योदनः, धर्मारण्यम् and बलाहकः.

III. (*a*) Give any five different uses of either the loc. or the Instru. Illustrate your answer by examples. (5)

(*b*) Define कारक, विकरण, अङ्ग and उपधा. (6)

IV, Give:—Pres. 2nd Per. Sing. of सञ्ज् with अनु, तृंह्.

Imperfect 3rd Per. Plu. of वी, द्विष् and विद्.

Imperative 2nd Per. Sing. of चकास्, शिष् and अस्.

Poten. 3rd Per. Sing. of अधी, शो Caus., and भी.

Perf. 2nd Per. Sing. of दारिद्रा, फण् and हु.
1st Future 2nd Per. Sing. of नश्, स्पृश्, गृह्.
2nd Future 1st Per. Sing. of रुध्, सिध् and क्लृप्. (17)

V. Translate into English:—

१ पुरुषा अपि बाणा अपि गुणच्युताः कस्य न भयाय ।
२ सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।
३ अल्पाक्षररमणीयं यः कथयति निश्चितं स खलु वाग्मी ।
४ निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ।
५ विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् । (10)

VI. Translate into Sanskrit:—

(*a*) We entered the Brahmin's house dilapidated by the cracking of the walls, but seeing the Brahmin plunged in meditation, we approached his wife, who showed us all proper hospitality; her body was emaciated and begrimed (= deeply soiled), her dress was tattered and dirty and she looked like the incarnation of poverty, attracted thither by admiration for the Brahmin's virtues. (15)

(*b*) A rich merchant made over all his wealth to his children. They promised him in return that they would provide honourably for all his wants. At first, all went well; but their attentions gradually relaxed, so that at length they behaved in a selfish manner. They reckoned, so to speak, every mouthful he ate and did not provide him with suitable or sufficient clothes. (10)

Group XIV.

I. (*a*) Translate into English:— (20)

अस्ति भूमेराभरणं कश्मीरा इति मण्डलम् । यत्किल विधात्रा द्वितीयं त्रिदिवमिव विनिरमायि । दृश्यभोगं हि त्रिदिवं सुकृतां कृतेऽनेन सुष्टपूर्वम् । इदं तु भोग्यभोगत्वात्ततोऽपि विशिष्यते । अत्र खलु श्रीश्च सरस्वती चेत्युभे अपि

' अहमेवात्र वस्तुमर्हा न त्वम् ' इति परस्परमीर्ष्ययेव ब्रुवत्यौ वसतिं कुरुतः ; धर्मद्रुहः कलेर्मात्र प्रवेशो भूदितीव तुहिनाद्रिणा स्वदेहपरिवेषेण रक्षास्य यत्नतः क्रियते। वितस्ता नाम तरङ्गिणी ' देवतीर्थमयादस्माद्दूरं याहि ' इति वीचिहस्तैः कल्मषं नुदतीव । सविधेऽस्य जलानि वहति । अत्रत्याः सितसुधाधौतास्तुङ्गाः प्रासादपङ्क्तयोऽत्यासन्नहिमवत्पादावलीभ्रमं जनयन्ति ।

(*b*) विलस विलस तनुमूर्ते तारे कुरु निजतेजो नभसि ततम्
किं त्वमसीति कियन्मम चेतसि कौतूहलमिदमुपजनितम् ॥ ध्रु० ॥
उपर्युपरि जगतोऽस्य नितान्तं प्रोन्नततमपदकृतवासे
कियद्विदूरे गगनमण्डले हीरकमाणिवद्विराजसे ॥
अस्तमने किल भूमण्डलतः संहृतकिरणे चण्डकरे
मन्दोन्मेषं निजप्रकाशं प्रकटीकुरुषे त्वमम्बरे ॥
विलस विलस भो निखिलयामिनीं कुरु निजतेजो वियति ततम्
सुविदितमेतद्बालानां यत्सुग्रीवादिष्टो हनुमान्पवनपुत्रत्वमिवात्मनः प्रकटयन्नभोमार्गेण सागरं ततार । अथ लङ्कां प्राप्तः स मैथिलीमन्वेष्टुं तत्र तत्र सुचिरं व्यचरत् । किं तु सा तस्य दर्शनपथं नागता । तेन खिन्नः स विश्रमितुकामो रावणोद्यानेऽशोकवृक्षराजिमाससाद । तत्रोन्नतामेकां शाखां समारूढो मानुषीविलापं शुश्राव । राक्षसाधिष्ठितेऽस्मिन्पुरे कुतो मनुष्यस्वरसंभव इति कौतुकाक्षिप्तहृदयस्तत्प्रभवजिज्ञासया, इतस्ततो विलोचने व्यापारयामास । तदा नातिदूरे वृक्षतलस्थितां कृशाङ्गीं वनितामेकां ददर्श । उपसृत्य च दीनवदनां शोकविधुरां तां रघुनाथकथितैस्तैस्तैर्लक्षणैर्जानकीयमिति ज्ञात्वा तस्याः पुरः पादपादवततार । कोऽन्वयं भवेदिति वितर्कयन्त्यास्तस्या रामनामाक्षरसनाथमङ्गुलीयकमुपजहार । तद्दर्शनेनेषल्लघूकृतदुःखभारा सा तं कौसलेयकुशलं पप्रच्छ । कथं च त्वया तीर्णोऽसौ विशालो मकरालय इत्यनुयुयुजे च । राघवक्षेमं निवेद्य, आञ्जनेयो निजं नभोलङ्घनं वर्णयामास, तत्संभवां चात्मानं बलवद्बाधमानां बुभुक्षां कथयांचकार । तदा रक्षकभीता सा ‘ अस्मिन्नुपवने संभृतरसानि भारवशात्पतन्ति फलानि गृहाण ’ । इति तमाज्ञापयामास । अथ तावद्भिः फलैरात्मनः क्षुन्निवृत्तिमनुत्प्रेक्षमाणो रक्षोगणं च

तृणीकुर्वाणः सः, स्वामिन्याः सीताया आज्ञाभङ्गं च रक्षन्, निजलाङ्गूलेन पाकाभिमुखफलबहुलांस्तांस्तान्विटपान्ससंभ्रममाकम्प्य ततः पतन्ति प्रभूतानि फलानि यथेच्छं खादति, वदति च 'पतन्ति फलानि कामं ग्रहीतव्यानि, न पुनः पाणिनोच्चितानि' इति । एवं लोके परेण कस्याप्यर्थस्यानुष्ठानाय दत्ताभ्यनुज्ञः कश्चित्, तेनाप्यतर्कितेन निपुणोपायेन दोषासङ्गं परिहरन्, यावच्छक्यं स्वार्थं संपादयति, स उच्यते पतत्फलाञ्च गृह्णाति, इति ॥ (30)

II. (1) Decline (*a*) प्राण (life), उभ *m.*, दीर्घ *m*, and राज्ञी in the Locative dual and Genitive plural.

(*b*) दार, रुष्, जग्मिवस् *n.*, and द्वितय *m.* in the Nominative dual and plural. (8)

(2) Give (*a*) The first and second persons, singular, of the Present of अद्, आस्, ईड्, and युज् (7th Conj.).

(*b*) The third person singular, passive, of the Perfect and Imperative of शी, मृ, हि, and भञ्ज् *Causal.*

(*c*) The past participles of वश्, स्न, हु and लिह्.

(*d*) The potential participles of जि, गै, वञ्च् and नृत्. (7)

III. Translate into English:--

(*a*) शबरी तत्र तौ दृष्ट्वा समुत्थाय कृताञ्जलिः ।
पादौ जग्राह रामस्य लक्ष्मणस्य च धीमतः ॥ १ ॥
पाद्यमाचमनीयं च सर्वं प्रादाद्यथाविधि ।
तामुवाच ततो रामः श्रमणीं धर्मसंस्थिताम् ॥ २ ॥
कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्धते तपः ।
कच्चित्ते नियताः प्राप्ताः कच्चित्ते मनसः सुखम् ॥ ३ ॥
रामेण तापसी पृष्टा सा सिद्धा सिद्धसंमता ।
शशंस शबरी वृद्धा रामाय प्रत्यवस्थिता ॥ ४ ॥
अद्य मे सफलं तप्तं स्वर्गश्चैव भविष्यति ।
त्वयि देववरे राम पूजिते भरतर्षभ ॥ ५ ॥
त्वयाहं चक्षुषा सौम्य पूता सौम्येन मानद ।
गमिष्याम्यक्षयाँल्लोकांस्त्वत्प्रसादादरिंदम ॥ ६ ॥

(*b*) १ उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी—
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ १ ॥

२ सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ॥ १ ॥ (6)

IV. (*a*) **Translate into Sanskrit the following, rendering by a single compound the words underlined:—**

1 He *turned* **त्रिकूट** *into his column of victory.*

(*b*) **Dissolve and name in बालबोध characters the following compounds:—अनिद्राः, यथाशक्ति, भातपत्रम्, द्विजशार्दूलाः, and पुंगवः.**

(*c*) **State and illustrate the uses of परा-जि as transitive and as intransitive.**

(*d*) **Illustrate the uses of the correlatives वरं-न (as implying comparison.)**

(*e*) **State the several senses of the possessive ffisux in the following:—धनवान् नरः, रूपवती स्त्री, हस्ती गजः, उदरी गजाननः, क्षीरी वृक्षः, हनूमान मारुतिः, and दण्डी वानप्रस्थः.** (15)

V. (*a*) **Translate into Sanskrit:—**

दशरथ, the aged monarch of अयोध्या, had three queens, but no son. He pined for progeny, and his anxiety increased as old age grew upon him. In this extremity, he was advised by his preceptor वसिष्ठ to perform an अश्वमेध. A sacrificial horse, the emblem of unlimited sovereignty was accordingly let loose by orders of the aged king. There was no body to dispute the sovereignty of the great sun-race of अयोध्या; and the horse was brought back to the sacrificial ground at the end of one year. (12)

(*b*) **Render freely into Sanskrit:—**

1 **Scarcely had he uttered these words, when the cow returned from the forest.**

2 That tumultuous uproar, filling the earth and sky with sound, rent the hearts of the enemies.

3 Love lightens labour, and sweetens sorrow.

4 Real knowledge comes from experience alone. (10)

Group XL.

I. Translate into English:—

तमुवाच महातेजाः सर्वलोकपितामहम् ।
भगीरथो महाबाहुः कृताञ्जलिपुटः स्थितः ॥ १ ॥

यदि मे भगवान्प्रीतो यद्यस्ति तपसः फलम् ।
सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ॥ २ ॥

गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ।
स्वर्गं गच्छेयुरत्यन्तं सर्वे च प्रपितामहाः ॥ ३ ॥

श्रुत्वा वाक्यं तु राजानं प्रत्युवाच ततो विधिः ।
एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन ॥ ४ ॥

What inaccuracy of composition do you observe in the phrase "गङ्गायाः सलिलक्लिन्ने भस्मनि" ?

II. (1) Give (*a*) The plural of the third person, Present, of जक्ष्, व्यध्, लिप् and मा (3rd Conj.)

(*b*) The third person singular, passive, of the Perfect and simple Future of अद्, तक्ष् , अर्च्, and कृ.

(*c*) The past participles of स्यन्द्, खन्, भ्रम्, and पच्.

(*d*) The absolutives of वि + तन्, प्र + चुर्, सं + जन् and ग्रह्. (9)

(2) Decline (*a*) इदम् *f.*, उदर्चिस् adj., युष्मद् and गोपा in the Genitive singular and Locative plural.

(*d*) पथ, गो, लघु adj., and भर्तृ in the Accusative and Locative singular. (6)

III. (*a*) Translate into English:—

बिभीषणः—अये हनूमान् । हनूमन्, ममागमनं देवाय निवेदय ।

हनूमान्—बाढम् । (राममुपगम्य) जयतु जयतु देवः ।

राजंस्त्वत्कारणादेव भ्रात्रा निर्विषयीकृतः ।
बिभीषणोऽयं धर्मात्मा शरणं त्वामुपागतः ॥ १ ।

रामः—कथं, बिभीषणः शरणागतः इति ? वत्स लक्ष्मण, सत्कृत्य प्रवेश्यतां बिभीषणः ।

लक्ष्मणः—यदार्य आज्ञापयति । (इति निष्क्रान्तः)

रामः—सुग्रीव, वक्तुकाममिव त्वां लक्षये ।

सुग्रीवः—देव, बहुमायाश्छलयोधिनश्च राक्षसाः । तस्मात्संप्रधार्य प्रवेश्यतां बिभीषणः ।

हनूमान्—मा मा एवम् ।

देवे यथा वयं भक्तास्तथा मन्ये बिभीषणः ।
भ्रात्रा विवदमानोऽपि दृष्टः पूर्वं पुरे मया ॥ १ ॥

बिभीषणः—(प्रविश्य) देव, अद्य कुशली संवृत्तोस्मि ।

भवन्तं पद्मपत्राक्षं शरण्यं शरणागतः ।
अद्यास्मि कुशली राजंस्त्वद्दर्शनविकल्मषः ॥ २ ॥ (11)

(*a*) (1) Name the nine kinds of nasals in Sanskrit and state the occasions for their uses with illustrations.

(2) Distinguish between the senses of—

कृष्णस्य तुला नास्ति, and **कृष्णेन तुला नास्ति**

(*c*) What is the meaning of **सतः पालकोऽवतरति** ?

(*d*) Distiguish between the senses of the **बहुव्रीहि** Compounds **जलपेय** and **पेयजल**. (12)

V. (*a*) Translate into English:—

शोकभरकृताक्रन्दोऽहं मित्रं शरणार्थमन्विष्यन्नपि भग्नाशोऽभवम् । यतो वयस्यगणो मां पर्यहार्षीत्, परिचितजनश्च शिथिलादरो जातः । सर्वेऽपि बद्धमुष्टयः

प्रज्ञावृद्धत्वमाश्रित्य, अत्यागसुलभानि उपदेशवचांसि मयि पर्याप्तं व्याहरन् । ततो मया चिन्तितम्, किमेतैर्मम ? मत्संनिधौ दाक्षिणपाणिसंज्ञकः सहजः सहायस्तिष्ठति, यो नूनमगणितसुखदुःखं मां व्यसनतः समुद्धरेत्, विविधमुपकुर्याच्च । तं वर्जयित्वा पराश्रयापेक्षा नाम खपुष्पावचयः । अत ईश्वरसमर्पितभरोऽहं तमेव कर्म मित्रकृत्यं किं न कारयामि ? एवं कृतमतेर्मम बलवदुपचितं धैर्यम् । प्रतिकूलेऽपि विधौ मम हस्तः समेधितबलः, अन्तरात्मा च चिन्तापनयविशदः संजातः । वारंवारं ममाशनवसनचिन्तां निवर्तयता हस्तमङ्गेन सुहृदाहं शुचः समुद्धृतः, विपदो मोचितश्च । यैरहं पूर्वं परित्यक्तः सर्वेऽपि ते वयस्यध्वंसका अधुना मामुपतिष्ठन्ति । उपदेशकधूर्ताश्च प्रमुदितवदना मामभिनन्दन्ति । सर्वैरप्यमीभिर्न मे किमपि कार्यम् । तेषामपीदं बाढं विदितमेव । अक्षीणदाक्षिण्य दाक्षिणपाणे, सर्वमिदं तवैवोपकृतिफलम् । नितान्तमुपकृतोऽस्मि त्वया । कस्यान्यस्य तावकमिव स्थिरं सौहार्दम् ?

(*b*) **Paraphrase:—**

मुञ्चति मुञ्चति कोशं
भजति च भजति प्रकम्पमरिवर्गः ।
हम्मीरवीरखड्गे
त्यजति त्यजति क्षमामाशु ॥ २ ॥ (5)

V. **Translate into Sanskrit:—**

One day a certain king, riding with his courtiers overtook a dervish (**भिक्षु**) who called out as they were passing " Give me a hundred pieces of silver, and I will give you a good piece of advice. " The company at first paid no attention to this strange demand; but as he continued to follow them, repeating the same cry, the king's curiosity was awakened, and turning to the dervish, he asked, " What advice is this, my friend, that you value at so large a sum of money ? " " Sir, " he answered, " deign to give me the sum, and you shall hear it. Believe me, you shall never regret the bargain. " The king expecting to hear some thing extraordinary, counted out the sum demanded by the dervish, who then uttered this weighty maxim: " Begin nothing without considering what the end may be. " (22)

Group XLI.

I. (*a*) Dissolve and name the following Compounds:—पुरुषशार्दूलः, पर्णच्छायम, बहुविज्ञानि, एवंविधानि and निर्मक्षिकम. (4)
(*b*) Distinguish between the senses of the following compounds:—

1 अनामयः and अनामयम्. 3. पेयजलः and जलपेयः.

2 पश्चिमरात्रिः and पश्चिमरात्रः 4 पीताम्बरम and पीताम्बरः (4)

II. (*a*) Translate freely into Sanskrit:—
1 It is time for you to enter on the second stage of life so as to be able to help others.

2 None can remain really inactive, even for a moment; for everybody is forced to act by the qualities of nature.

(*b*) Translate into English:—

यस्यास्ति सर्वत्र गतिः स कस्मात्
स्वदेशरागेण हि याति नाशम् ।
तातस्य कूपोऽयमिति ब्रुवाणाः
क्षारं जलं कापुरुषाः पिबन्ति ॥ १ ॥

येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन स मे वृत्तिं विधास्यति ॥ २ ॥ (६)

III. (1) Decline (*a*) अस्मद्, स्व (a relative), द्वितय *m*. and सुभ्रू in the Nominative plural and Dative singular.

(*b*) उपानह्, शत्रुघ्न, अक्षि, and सुतनु (a beautiful woman) in the Locative and Vocative singular. (8)
(2) Give (*a*) The second person, sing. and plural, Present, of भञ्ज्, पा, ऋ, and स्तम्भ्.

(*b*) The third person singular, Perfect and Periphrastic Future, of यज्, दुह्, क्लृप्, and सह्.

(*c*) The past participles of क्षै, अद्, धे, and श्वि.

(*d*) The absolutives of वृत्, स्वप्, भञ्ज्, and भ्रम्. (10)

IV. (*a*) Translate into English:—

शापवशाच्छुकत्वमापन्नो मुनिरात्मानं बद्धं वीक्ष्य लुब्धकं ब्रूते। कस्त्वम्। किमर्थं वा त्वया बद्धोऽस्मि। यद्यामिषतृष्णया तत्किमसि क्षुप्त एव न व्यापादितोऽस्मि। किं मया निरागसा बन्धनदुःखमनुभावितेन। अथ केवलमेव कौतुकात् ततः कृतं कौतुकम्। मुञ्चतु मामिदानीं भद्रमुखः। मया खलु वल्लभजनोत्कण्ठितेन दूरं गन्तव्यम्। अकालक्षेपक्षमं वर्तते मे हृदयम्। भवानपि प्राणिधर्मे वर्तते। एवमुक्तः स मामुक्तवान्। महात्मन्नहं क्रूरकर्मा जात्या चाण्डालः। न मया त्वमामिषलुब्धेन कुतूहलिना वा बद्धः। मम खलु स्वामिनो भिल्लपतेर्दुहिता कौतकमये प्रथमे वयसि वर्तते। तस्यास्त्वं महाश्चर्यकारीति केनापि कथितः। ततस्त्वद्ग्रहणाभिलाषिण्यास्तस्याः कृते मया त्वं बद्धोऽसि। बन्धे मोक्षे चाधुना सा ते प्रभवति।

(16)

(*b*) 1 Parse the following words:—

तिलेभ्यः प्रति यच्छतिमाषान्

2 Distinguish between the transitive and the intransitive use of उपवस्.

3 Illustrate the use of अतिरिच्यते in a sentence.

4 Dissolve the compounds in the line:—

निर्वनो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनम्।

5 Give the Dative singular of the feminines of पाण्डु, लघु and शुचि. (11)

राक्षसः—(भयाक्रान्तं ब्राह्मणं प्रति) अस्ति मे तत्रभवती जननी। तया हमाज्ञप्तः—पुत्र, ममोपवासनिसर्गार्थं कश्चिन्मानुषः परिगृह्यानीयताम्। ततो मयासादितो भवान्

पत्न्या चारित्र्यशालिन्या द्विपुत्रो मोक्षमाप्स्यसि।
बलाबलं परिज्ञाय पुत्रं चेदेकमर्पयेः॥ १॥

ब्राह्मणः— किमहं श्रुतवान्वृद्धः पुत्रं शीलगुणान्वितम्।
पुरुषादस्य दत्त्वा हा शोचन्निर्वृतिमाप्नुयाम्॥ २॥

राक्षसः— यद्यर्थितो द्विजश्रेष्ठ पुत्रमेकं न मुञ्चसि ।
सकुटुम्बः क्षणेनैव विनाशमुपयास्यसि ॥ ३ ॥

ब्राह्मणः— कृतकृत्यं शरीरं मे परिणामेन जर्जरम् ।
राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम् ॥ ४ ॥

ब्राह्मणी— मा मा एवम् । पतिमात्रधर्मिणी खलु पतिव्रता । गृहीतफलेनैतेन शरीरेण आर्य कुलं च रक्षितुमिच्छामि ।

राक्षसः— न खलु स्त्रीजनेन न वा वृद्धेन मे कार्यम् ।

ज्येष्ठः पुत्रः—मम प्राणैर्गुरुप्राणानिच्छामि परिरक्षितुम् ।
रक्षणार्थं कुलस्यास्य मोक्तुमर्हति मां भवान् ॥ ५ ॥

द्वितीयः— ज्येष्ठः श्रेष्ठः कुले लोके पितॄणां च सुसंप्रियः ।
ततोऽहमेव यास्यामि गुरुवृत्तिमनुस्मरन् ॥ ६ ॥

कनिष्ठः— ज्येष्ठो भ्राता पितृसमः कथितो ब्रह्मवादिभिः ।
ततोऽहं कर्तुमस्म्यर्हो गुरूणां प्राणरक्षणम् ॥ ७ ॥ (20)

V. Translate into Sanskrit :—

Some thieves, getting into a house by the backway, found nothing in it but a cock walking up and down. So, as there was nothing else to steal, they stole him. And he when they were on the point of putting him to death, begged hard for his life, saying how useful he was to man. "I wake them up even in the night," said he, "and make them work." But they replied, "That's why we are going to sacrifice you: you wake men up and you do not let us go quietly about and steal." The deeds that are useful to the good are hated by the wicked. (15)

Group XLII.

I. Translate into English:—

हनूमान्—(रावणं प्रति) भवता किमर्थं राघवस्य दारापहरणं कृतम् ।

विभीषणः—सम्यक् पृच्छति हनूमान् ।

अपास्य मायया रामं त्वया राक्षसपुंगव ।
भिक्षुवेषं समास्थाय च्छलनापहृता हि सा ॥ १ ॥

रावणः— विभीषण, किं विपक्षपक्षमवलम्बसे !

विभीषणः— प्रसीद राजन्वचनं हितं मे
प्रदीयतां राघवधर्मपत्नी ।
इदं कुलं राक्षसपुंगवेन
त्वया हि नेच्छामि विपद्यमानम् ॥ २ ॥

रावणः— अलमलं भयेन ।
कथं लम्बसटः सिंहो मृगेण विनिपात्यते ।
गजो वा सुमहान् मत्तः सृगालेन निहन्यते ॥ ३ ॥

हनूमान्—भो रावण, विपद्यमानभाग्येन भवता किं युक्तं राघवमेवं वक्तुम् ।
मा तावत् भोः—
नक्तंचरापसद रावण राघवं तं
वीराग्रगण्यमतुलं त्रिदशेन्द्रकल्पम् ।
प्रक्षीणपुण्य भवता भुवनैकनाथं
वक्तुं किमेवमुचितं गतसार नीचैः ॥ ४॥

रावणः— किं बहुना । अभिधीयतां मद्वचनात्स ते मानुषः स्वामी ।
अभिभूतो मया राम दारापहरणाद्रसि ।
यदि तेऽस्ति धनुःश्लाघा दीयतां मे रणो महान् ॥ ५ ॥ (16)

(2) Distinguish between

१ **विपद्यते** and **विपाद्यते**	४ **गमकः** and **गामकः**
२ **निपाय** and **निपीय**	५ **ग्रहीष्यते** and **ग्राहिष्यते**
३ **क्षीण** and **क्षाम**	६ **प्रतिष्ठते** and **प्रातिष्ठासते** (6)

II. (1) Give (*a*) the Accusative singular and Ablative plural of स्त्री, नप्तृ, दिश, and विश्वसृज्.

(*b*) the Locative singular and plural of सेनानी, अर्वन्, तिर्यञ्च्, and सखि. (8)

(2) Give (*a*) the third person, singular and plural, of the Present of सृ, घ्रा, सू U, and विष्.

(*b*) the third person singular, passive, of the Perfect and Simple Future of व्यध्, हिंस्, शंस् and स्तृ.

(*c*) the past participles of तन्, वह्, कृ and भञ्ज.

(*d*) the third person singular, Imperfect, of the causal of ह्री, रध्, स्ना, and गम्. (10)

III. (*a*) Render into English:—

१ ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं क्रोधात्प्रतिपद्यते जन्तुः ॥ १ ॥

२ किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ १ ॥

३ प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ १ ॥

४ विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतज्—
ज्ञानाय दानाय च रक्षणाय ॥ १ ॥ (13)

(*b*) Translate into English:—

स तु गत्वा मधुपुरं प्रविश्य च दशाननः ।
न ददर्श मधुं तत्र भगिनीं दृष्टवान्निजाम् ॥ १ ॥
तस्य राक्षसराजस्य नाम्ना कुम्भीनसी सती ।
पुरो बद्धाञ्जलिर्भूत्वा शिरसा चरणौ गता ॥ २ ॥
तां समुत्थापयामास न भेतव्यमिति ब्रुवन् ।
स्वसारं राक्षसः प्राह किं परं करवाणि ते ॥ ३ ॥

साब्रवीद्यादि मे राजन्प्रसन्नस्त्वं महाभुज ।
भर्तारं न ममेहाद्य हन्तुमर्हसि मानद ॥ ४ ॥

न हीदृशं भयं किंचित्कुलस्त्रीणामिहोच्यते ।
भयानामपि सर्वेषां वैधव्यं व्यसनं महत् ॥ ५ ॥

सत्यवाग्भव राजेन्द्र याचमानां च रक्ष माम्
त्वया ह्युक्तं महाराज न भेतव्यमिति स्वयम् ॥ ६ ॥ (15)

(c) 1 State and illustrate the three uses of the preposition आ.

2 Give three words always used in the dual.

3 Distinguish between the senses of रघु in the singular and in the plural.

4 Prove whether the Accusative plural, neuter, is always identical with the Nom. plural. (7)

VI. Translate into Sanskrit:—

Following the advice of Sage व्यास, अर्जुन visited the हिमालय in order to gain the favour of शिव, and obtain from him certain potent celestial weapons for the destruction of the कौरवs, of whom the पाण्डव heroes seem, notwithstanding their own wonderful fighting qualities, to have had a wholesome dread. Having arrived upon the sacred mountain, अर्जुन went through a course of austerities with arms upraised, leaning upon nothing and standing on the tips of his toes. For food he at first had withered leaves, but eventually fed on air alone. Such was the fervour of his penance that the earth around him began to smoke, and the alarmed ऋषिs came in a body to शिव, and asked him to interfere. (25)

Group XLIII.

I. Translate into English:—

रावणः— (आत्मगतम्)

माययापहृते रामे सीतामेकां तपोवनात् ।
हरामि रुदतीं बालाममन्त्रोकामिवाहुतिम् ॥ १ ॥

सीता— (उटजगता बहिरालोक्य) कोऽसौ तापसलिङ्गधारी ?

रावणः— (स्वं रूपं गृहीत्वा) किं न जानीषे ?

युद्धे येन सुराः सदानवगणाः शक्रादयो निर्जिता
दृष्ट्वा शूर्पणखाविरूपकरणं श्रुत्वा हतौ तत्सुतौ ।
दर्पाद्दुर्मतिमप्रमेयबालिनं रामं विलोभ्य च्छलैः
स त्वां हर्तुमना विशालनयने प्राप्तोऽस्म्यहं रावणः ॥ २ ॥

सीता— आर्यपुत्र, परित्रायस्व (इत्याक्रोशति)

रावणः— विलपसि किमिदं विशालनेत्रे
विगणय मां च यथा तवार्यपुत्रम् ।
विपुलबलयुतो मयैष योद्धुं
ससुरगणोऽप्यसमर्थ एव रामः ॥ ३ ॥

(सीतां बलाद्गृहीत्वा)

भो भो जनस्थानवासिनस्तपस्विनः । शृण्वन्तु शृण्वन्तु भवन्तः ।
बलादेष दशग्रीवः सीतामादाय गच्छति ।
करोतु क्षात्रनिष्ठश्चेद्रामः कामं पराक्रमम् ॥ ४ ॥ (18)

(*b*) Dissolve and name the compounds in stanza 2 above. (10)

II. (1) Give (*a*) the plurals of the second and third Persons Present, of ह्, ध्वंस्, रु and दा (3rd Conj.).

(*b*) the third person, singular, passive, of the Perfect and Simple Future of हन्, व्रद्, सृज्, and क्लृप्.

(*c*) **the past participles of हन्, गॄ, म्लै and गुह्.**

(*d*) **the Potential participles ending in य of क्री, दा, भू and स्पृश्.**

II. (2) Give (*a*) the Genitive sing. and plural of **पति, वृत्रहन्, प्रधी** (good intellect), and **ग्रामणी.**

(*b*) **the Nominative sing. and Accusative plural of अहन्, पपी, महिमन्,** and **कामदुह्.** (1)

III. (*a*) Translate into Sanskrit :—

1 God helps those that help themselves.

2 Dost thou love life ? Then do not waste thy time, **for** this is **what** life is made of.

3 Time once lost is never found again.

4 There are no gains without pains.

5 If you would have a good and faithful servant, serve yourself. (11)

(*b*) कुमुदवनमपश्रि श्रीमदम्भोजषण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां ही विचित्रो विपाकः ॥ १ ॥

वार्ता च कौतुकवती विमला च विद्या
लोकोत्तरः परिमलश्च कुरङ्गनाभेः ।
तैलस्य बिन्दुरिव वारिणि दुर्निवार-
मेतत्त्रयं प्रसरति स्वयमेव लोके ॥ १ ॥

मातृवत्परदारांश्च परद्रव्याणि लोष्टवत् ।
आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ॥ १ ॥ (11)

IV. (*a*) Render into Sanskrit the following sentences, by using nouns in oblique cases for the words in Italics:— 1 He lives *on water.* 2 Ornaments are made *of gold.* 3. **सीता** got angry *with* **लक्ष्मण.** 4 Children fear a *wolf*

5 कुम्भकर्ण slept *for 6 months.* (5)

(*b*) Name the following forms:—आनञ्ज, चक्रे, ददे, दधानः, गर्जन्ति, and यतः.

V. Translate into Sanskrit:—

The courtiers smiled at the dervish, and the apparent simplicity of their master. They expected that the King would either treat the matter as a pleasant jest, or threaten the insolent dervish with punishment. But to their surprise he was neither amused nor angry. Turning to his smiling attendants he said in a serious tone, "Why do you laugh? I see nothing ridiculous in this good man's advice; on the contrary, it seems to me most wise and salutary. This maxim shall be my rule of conduct in future; and that it may always be before me, I shall have it engraved upon my plate, and written in distinct characters on every door and wall of my palace." (25)

Group XLIV.

I. (*a*) Translate into English:—

धृतराष्ट्रः—वत्स, भीष्मद्रोणादिषु हतेषु समरात् निवर्तनमेव ते श्रेयः ।

दुर्योधनः—समरान्निवृत्य किं मया कर्तव्यम् ?

गान्धारी—यत्पिता ते विदुरो वा भणिष्यति तदनुतिष्ठ ।

दुर्योधनः—कथयतु तातः ।

धृतराष्ट्रः—वत्स, किं विस्तरेण ? संधत्तां भवानिदानीं युधिष्ठिरस्य समीप्सितेन पणेन ।

दुर्योधनः—हीयमानान्किल रिपून् नृपाः संदधते कथम् ।
दुःशासनेन हीनोऽहं सानुजः पाण्डवोऽधुना ॥ १ ॥

धृतराष्ट्रः—वत्स एवं गतेऽपि मत्प्रार्थनया न किंचिन्न करोति युधिष्ठिरः । तथा च तस्य प्रतिज्ञातमपि श्रूयते । नाहमेकस्यापि भ्रातुर्विपत्तौ प्राणा-

न्यारयिष्यामीति । अतः अनभिनन्दितसमरः शक्योऽसौ त्वया संधातुम् ।

दुर्योधनः— एकेनापि विनानुजेन मरणं पार्थः प्रतिज्ञातवान्
भ्रातॄणां निहते शते विषहते दुर्योधनो जीवितम् ।
तं दुःशासनशोणिताशनमरिं भिन्दन्गदाकोटिभि-
र्भीमं दिक्षु न विक्षिपामि कृपणः संधिं विदध्यामहम् ॥ १ ॥

(20)

II. (a) Translate into Sanskrit:—

यावत्स्वस्थो ह्ययं देहो यावन्मृत्युश्च दूरतः ।
तावदात्महितं कुर्याः प्राणान्ते किं करिष्यसि ॥ १ ॥

कान्ताकटाक्षविशिखा न दहन्ति यस्य
चेतो न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्च न लोभपाशै—
लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ २ ॥ (9)

(b) Render into Sanskrit :—

1 He is blind of one eye.
and 2 He is blind of both his eyes. (3)

(c) State and illustrate the uses of कृत and शुष्क as past participles. (4)

III. (a) Translate into English:—

रामः प्रेक्ष्य तु तं गृध्रं रक्षसा पातितं भुवि ।
सौमित्रिं स्नेहसंपन्नमिदं वचनमब्रवीत् ॥ १ ॥

ममायं नूनमर्थेषु यतमानो विहंगमः ।
राक्षसेन हतः संख्ये प्राणांस्त्यजति मत्कृते ॥ २ ॥

जटायो यदि शक्नोषि वाक्यं वक्तुं पुनर्मयि ।
सीतामाख्याहि भद्रं ते वधमाख्याहि चात्मनः ॥ ३ ॥

किंनिमित्तं जहारार्यां रावणस्तस्य किं मया ।
अपराद्धं तु यद्दृष्ट्वा रावणेन हृता प्रिया ॥ ४ ॥

कथंवीर्यः कथंरूपः किंकर्मा स च राक्षसः ।
क चास्य भवनं तात ब्रूहि मे परिपृच्छतः ॥ ५ ॥
तमुद्वीक्ष्य स धर्मात्मा विलपन्तमनाथवत् ।
वाचा विक्लवया राममिदं वचनमब्रवीत् ॥ ६ ॥
सा हृता राक्षसेन्द्रेण रावणेन दुरात्मना ।
परिक्रान्तस्य मे तात पक्षौ छित्त्वा निशाचरः ।
सीतामादाय वैदेहीं प्रयातो दक्षिणामुखः ॥ ७ ॥ (20)

(*b*) Dissolve and name the compounds विहंगमः, किंनिमित्तम्, कथंरूपः, किंकर्मा, निशाचरः and दक्षिणामुखः. (6)

IV. (1) Decline (*a*) द्वि *n.*, उर्वीरुह्, स्वाराज्, and सुसखि (a good friend) in the Instrumental sing. and plural.

(*b*) भूपति, पुण्याह, एकरात्र, and क्रोष्टु in the Accusative and Genitive singular. (8)

(2) Give (*a*) The first and third person, sing., Present of भिद्, स्तु, शी, and यम्.

(*b*) The third person singular, passive, of the Perfect and Imperfect, of स्वञ्ज्, गुञ्ज्, गै and जन्.

(*c*) The past participles of व्रश्च्, क्षम्, सह्, and नह्.

(*d*) The absolutives of गम्, सिव्, लू, and वह्. (21)

V. Translate into English :—

A king, having seen a bird seated on the branch of a tree; said to the men who were with him, "I wish to shoot the bird ; give me the bow." So they gave him the bow and arrow. He drew the bow, and took aim; but his arm shook and so he failed in shooting the bird. The king was much ashamed that he did not hit the bird, even while it was not flying, but seated on a branch; and he was going to try again. But before he had had time to draw the bow, and discharge a second arrow, the bird flew away. The men then said, "Ah, what a kind and good man the king of ours is ! He was too kind to shoot the poor bird; so he let it fly away and escape." (19)

Group XLV.

I. Translate into English:—

ननु वदत भोः प्रकाशो नाम किं वस्तु । मम तु स विधिनैव चिरायापहृतः । दर्शनक्षमत्वं मनुजस्य किं किं श्रेय आवहति तत्तत्कथयित्वा दग्धदैवं दृशा विहीनं मामनुगृह्णीत । यूयं नयनसुभगानि वस्तूनि वर्णयथ, गदथ च भास्वान्भासुरं भातीति । एतत्सर्वमपि अन्धस्य मे नास्ति । केवलं द्युमणिद्युतिर्मया स्पर्शतोऽनुभूयते ! न पुनर्वेद्मि कथं स मयूखान्विसृजति, कथं वा दिननिशयोः कालं विभजति । मदीयौ वासरविभावर्यौ न विभाकरकृते, किं तु मयैव निर्मिते । यतः क्रीडनो मम दिनम्, निद्रानोऽपि च निशा । किं च, अहं चिरं जागर्मि चेत्, तावन्तमपि दिवसं द्राघयितुं मे विभवः । इत्थमन्धत्वमपि नैकान्ततो निर्गुणम् । अतो दिधिषुक्तं मम दैन्यं शोचतां युष्माकमेतानि दीर्घोष्णानि निःश्वसितानि अहमस्थाने गणयामि । यदीयदर्शनसुखस्यास्वादः न मया पुरा ज्ञातः, न वा भविष्यति मम सुलभः, तदहमसदेव समर्थये । शशशृङ्गमिव न तन्मम सुखस्य दुःखस्य वा हेतुतां व्रजति । अतो ममात्यन्तदुरधिगमेत्यालोक्य, दर्शनशक्तिमुद्दिश्य अलमेतैर्ममोद्वेगमात्रफलकैः शोकवचोभिर्युष्माकम् । अथ वा कामं मां जनुषान्धत्वास्छोच्यं चिन्तयन्तु भवन्तः, अहं पुनस्तत्सर्वमविगणय्य प्रकामं गायामि, स्वपितुरत्वाच्च न राज्ञेऽपि स्पृहयामि । (30)

II (a) 1 What is the meaning of :—

मासमधीतो नायातः, and **एतत्कपिकुलस्य क्रीडितम्.**

2 Distinguish between the senses of the compounds **पुत्रप्रियः,** and **प्रियपुत्रः.**

3 Take a simple sentence with a locative absolute phrase and expand it into a complex sentence. (10)

(b) 1 State the sets of prefixes after which roots **वस्, स्था,** and **रम** become transitive, Atm. and Par. respectively.

2 State and illustrate the uses of an infinitive subordinate to युज्यते. (6)

III. (1) Decline (a) पञ्चन् *n*, अदस् *f.*, मातृ, and सूनु in the Accusative sing. and plural.

(b) तादृश् · क्षुध, दन्त, and तुरासाह् in the Locative sing. and plural. (8)

(2) Give (a) The third person singular, and first person plural, Present, of रुध्, दिव्, धा, and क्री.

(b) The third person plural, Perfect, of स्तु, पॄ, वल्, and वस् cl. 1.

(c) The past participles of नश् with प्र, भ्रस्ज्, कम् and धा.

(d) The Perfect participles of हन्, स्तु, नी, and स्तृ. (11)

IV. (a) Translate into English :

मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ १ ॥

अमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥२॥

अधिगतमहिमा मनुष्यलोके
बत सुतरामवसीदति प्रमादी ।
गजपतिरुरुशैलशृङ्गवर्ष्मा
गुरुरवसीदति पङ्कभाङ् न दारु ॥ ३ ॥ (10)

(b) Dissolve and name the compounds in one of the above stanzas. (7)

V. Translate into Sanskrit :—

Long long ago, in the north of India, there lived a king, named शुद्धोदन and his queen माया. A beautiful son was born to them; they named him सिद्धार्थ. He was very carefully brought up by his father, who called together all the wisest men in his kingdom to teach him all that a young prince should know. Prince सिद्धार्थ soon grew very learned, so that his teachers could teach him no more. Though he was learned in books, and skilled in the use of all kinds of weapons, he never grew vain or proud, but always treated his teachers with reverence and his companions with gentleness and affection. (18)

Group XLVI.

I. Translate into English :—

यत्र यत्राहं चक्षुः क्षिपामि, तत्र तत्र मदीयमेव स्वाम्यं विद्यते । अविद्य-मानमनुजान्तरेऽस्मिन्देशे कुतो मम स्वामित्वापायशङ्का ! आसमुद्रं ये केऽपि वन-चरा नभश्चरा वा सत्त्वाः स्युः, ते मद्वर्जं कस्यान्यस्य भवेयुः । सत्यमेवं विदुषां संमतानां विजनसुखानां नैकमपि मयात्रोपलभ्यते । वरं मे संशयसंकुलमप्यन्यत्र जीवनम्, न त्वस्मिञ्जनविरहविरसे देशे साम्राज्यम् । अत्र हि मया जनान्तरदर्शन-सुखरहितं स्थातव्यम्, प्राणयात्राप्याप्रलयमेकाकिनैवानुवर्तनीया । श्रान्तसुभगया च मनुजगिरा न कदापि मम श्रवणगोचरया भाव्यम् । अत्यन्तापरिचयवशाच्च तस्याः, मदीयोऽप्येष स्वरसंयोगः श्रूयमाण एव भयमिवोपजनयति मे । क्षेत्रचराः सत्त्वा अपि मामचकितं प्रेक्षन्ते । यस्मान्मनुजदुष्कर्मणां ते सुतरामनभिज्ञाः । एष तेषां भयाभाव एव मम भयमुद्भावयति । भो भोः समीरणाः, सावज्ञमप्रतिहतं च मयि प्रवर्तमानानपि युष्मानिदमभ्यर्थये, यद्भवदोषान्मद्दुरासदाया अपि कस्याश्चि-न्मनुजावासभूमेः स्नेहोत्तरामानन्दजननीं प्रवृत्तिं रहोवासिने मह्यमानयत । कथ-यत च मे, अपि मत्सखा मुहुर्मुहुर्मम स्मरन्ति, उत्कण्ठन्ते वा मम संनिकर्षस्य । अपि नाम विधिनिरुद्धसुहृद्दर्शनस्यापि मे मित्राणि भवेयुः । (26)

(b) (1) Parse the words in the following :— (10)

अधीतं त्वया कस्य हेतोः विस्मृतम्.

(2) Illustrate the use of विशिष्यते.

(3) Write a note on the syntax of उत्तरेण in a sentence.

(4) State the use of the suffix आनी in भवानी, हिमानी, and यवनानी.

II. (1) Give (a) The Accusative and Locative singular of सायाह्न, उदन्च् *m.*, कर्कन्धू and एतद् *f.*

The Vocative sing. and Genitive plural of यतिन्, कर्मयोग, नवरात्र and चन्द्रमस्. (9)

(2) Give (a) The first and second person, singular, of the Present of ग्रह, तन्, जागृ, and हिंस्.

(*b*) The first person singular of the Periphrastic Future, and the third person plural of the Perfect ,of तन्, वृध, वह् and शी.

(*c*) The past participles of दंश्, जन्, ली, and शी.

(*d*) The absolutives of सं + गम्, अनु + वच्, वि + ली, and यज्. (11)

II. (*a*) Translate into English :—

काष्ठादग्निर्जायते मथ्यमानात्
भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां
मार्गारब्धाः सर्वयत्नाः फलान्ति ॥ १ ॥
गुणग्रामाविसंवादि नामापि हि महात्मनाम् ।
यथा सुवर्णश्रीखण्डरत्नाकरसुधाकराः ॥ २ ॥ (8)

(*b*) Name and dissolve the compounds in the second stanza above, and also द्वादश and द्वात्रिंशति: (8)

IV. (*a*) Render into Sanskrit in two ways the sentence :— "He likes milk" by using रोचते and रोचयते respectively as verbs. (3)

(*b*) Translate freely into Sanskrit :—

1 Taking off their head-dresses, they sought his protection.

2 I look after the welfare of those who, never idle, worship me alone, thinking of no other.

3 An astrologer who was famed for his great learning and his knowledge of the stars, went out for a walk. As he walked, all the time looking up at the sky, he said to himself "Oh, how much wiser am I than most men ! All the secrets of the stars are known to me. I read them as other men read books. What a fine thing it is to have brains, and how glad I am not to be stupid as some are." Thus speaking, he came to a well, but being far too busy praising his own cleverness to notice it, he tripped and fell head-long, and there he had to stay until his servant, hearing his cries, came and pulled him out. (25)

Group XLVII.

I (*a*) Translate into English:—

कदाचिच्छीनतौ प्रभातवेलायां, तपनपवनयोरहमेव त्वत्तो गरीयानिति वदतो-र्महान्संघर्षो जातः। रंहसा कम्पितवृक्षो वातोऽवदत् । पश्य ममांशसंभूतेन भीमेन किं कृतम् । मात्रा सहिताः सर्वे पाण्डवा जतुगृहात्क्षेमेण निर्गताः, इत्यत्र स एव हेतुः। विराटभवने सैरन्ध्रीभावेन सेवामानां याज्ञसेनीं कामयमानः, राजबन्धुत्वाज्जातदर्पो मुषितविवेकश्च कीचकः, तेनैव भूमिवर्धनो विहितः । भ्रातृशतपरिवृतो भीष्मादि-सहायः कौरवनाथोऽपि तेनैव यमक्षयं नीतः ।

एतस्मिन्नाविष्कृतमयूखमन्दहासो हरिद्रुयो बभाषे । त्वं तावद्बलवान्खलु । परं ममापि तेजसः कोऽपि महिमा । मज्जातजानो युधिष्ठिरः, धर्मपराणामादर्शः, समाश्रयः सम्पायाः, निबन्धनं सत्यस्य, सागरः करुणायाः, निवासः सत्वस्य । असामान्यगुणोत्कर्षः स पुरातनानां नरेश्वराणां धुरि कीर्तितः । त्वदपत्यस्य साहसैकरसिकस्यापि स वन्द्यः । एतेन हतवचसा समीरणेन भूयोऽपि भणितम् । किं वाक्कलहेन ? चक्षुर्वै सत्यम् । एतस्य पुरः प्रस्थितस्य पान्थस्य कन्थापनयने कः समर्थ इति द्रक्ष्यावः ।

यावत्स इत्थं वदति तावत्सर्वतः प्रवृत्तश्चक्रवातः । तेनाहतः सोऽध्वगः, कन्थां वातवेगेन स्रंसमानां दृढतरमेव परिदधौ । इत्थं मोघशक्तिं वातमपसार्य, उष्णधाम्ना भास्करेण सुखोष्णा रश्मयश्च विकीर्णाः, पथिकेन च शीतनिवारण-यत्नस्य पुनरुक्ततां प्रेक्ष्य, भारभूतश्चीवरपटः परित्यक्तः । येन सिद्धं सवितुः प्राधान्यम् । (25)

(*b*) Quote or frame Sanskrit parallels for the following:—

1 Either don't attempt, or go through it.

2 Diligence is of no use where luck is wanting.

and 3 Efforts, and not mere wishes, accomplish undertakings. (6)

II. (1) Decline (*a*) स्रज्, विश्वसृज्, स्वसृ, and वस्तु in the Accusative sing. and Ablative plural.

(*b*) **मनोरुद्वार, ककुभ, and कामदुह्** in the Nominative Sing. and Locative plural. (3)

(2) Give (*a*) Third person singular and second person plural, of the Present of रिच्, हा, ईश्, and अश् A.

(*b*) The third person singular, passive, of the Perfect and potential of स्तु, हृ, वन्, and प्रच्छ्.

(*c*) The past participles of नम्, ज्या, शम् and ग्लै.

(*d*) The potential participles of खन्, क्षि, पा, and कृ. (9)

III. (*a*) Translate into English :—

लक्ष्मणः— जयत्वार्यः। आर्यस्याभिप्रायं श्रुत्वा अग्निप्रवेशाय प्रसादं प्रतिपालयत्यार्या।

रामः— अस्याः पतिव्रतायाश्छन्दमनुतिष्ठ।

लक्ष्मणः— यदाज्ञापयत्यार्यः। (परिक्रम्य) भोः कष्टम्।
विज्ञाय देव्याः शौचं च श्रुत्वा चार्यस्य शासनम्।
धर्मस्नेहान्तरे न्यस्ता बुद्धिर्दोलायते मम ॥ १ ॥
(निष्क्रम्य पुनः प्रविश्य) आश्चर्यमाश्चर्यम्।

एषा ह्यार्या— विकसितशतपत्त्रदाममृद्वी
ज्वलनमिहाशु विमुक्तजीविताशा।
श्रममिह तव निष्फलं च कृत्वा
प्रविशति पद्मवनं यथैव हंसी ॥ २ ॥

हनूमान्— (प्रविश्य) जयतु देवः।
एषा कनकमालेव ज्वलनाद्वर्धितप्रभा।
पावना पावकं प्राप्य निवृत्ता निर्विकारतः ॥ ३ ॥

अग्निः— (प्रविश्य)—
इमां गृहीष्व राजेन्द्र सर्वलोकनमस्कृताम्।
अपापमनसं शुद्धां जानकीं पुरुषोत्तम ॥ ४ ॥

रामः— अनुगृहीतोऽस्मि।
जानतापि च वैदेह्याः शुचितां धूमकेतन।
प्रत्ययार्थं हि लोकानामेवमेव मया कृतम् ॥ ५ ॥ (12)

(*b*) Render freely into English :—

1 Facility of action comes by habit.

2 He who loses his honour, has nothing else he can lose. (5)

(*c*) 1 Rewrite the following by changing the cases of words underlined.

लतास्तं प्रसवैरवाकिरन्.

2 Parse the words in the following line :—

वयस्य, न भेतव्यमस्मादृशैर्मित्रैर्विद्यमानैः (5)

IV. (*a*) Translate into English :—

कमठपृष्ठकठोरमिदं धनुर्मदनमूर्तिरसौ रघुनन्दनः ।
कथमधिज्यमनेन विधीयतामहह तात पणस्तव दारुणः ॥ १ ॥

(*a*) Analyse and name the compounds occurring in th above stanza. (8)

V. (*a*) Translate into Sanskrit :—

Having married Shakuntalâ and having given her his ring in token of his good faith, King Dushyanta returned to his capital, while Shakuntalâ remained in the hermitage of her father. After this the sage Durvasas visited the hermitage of Kanva, but Shakuntalâ was so engrossed in thinking of her husband that she was not aware of the approach of the sage. He cursed the damsel, 'You shall be forgotten by your husband.' But after a while he took pity on her and said that the curse would end as soon as Dushyant would see the ring. Shakuntalâ found that she was pregnant and set out for the palace of her husband. On her way she bathed in a sacred lake when the ring dropped from her finger and was lost in the water. The king could not remember his

marriage with her and so he repudiated her. Her mother came down from heaven and carried her away to a jungle, where she gave birth to a son who was named Bharata. (20)

(*b*) Give the Sanskrit proverb corresponding to :-

' A fool may give a wise man good counsel. ' (2)

Group XLVIII.

I. (*a*) Translate into English :—

अन्येद्युश्चातिक्रामत्यशनकाले मे दूयमाने हृदये च, सा स्वपाणिनोपनीय नानाविधानि पक्वान्यपक्वानि च फलानि सुरभिशीतलं च पानीयं, अप्रतिपन्नतदुपभोगं मामारोपितलोचना स्निह्यन्तीवावोचत् । क्षुत्पिपासार्दितानां हि पशुपक्षिणां निर्विचारचित्तवृत्तीनामुपनतेष्वाहारेष्वनुपयोगो न संभवत्येव । तद्यदि एवंविधस्त्वं कोऽपि भोज्याभोज्यविवेककारी पूर्वजातिस्मरोऽस्मदीयमाहारं परिहरसि, तथापि तावद्भक्ष्याभक्ष्यविवेकरहितायां तिर्यग्जातौ वर्तमानस्य ते किं वाभक्ष्यम्, यन्न भक्षयसि ! येन चोत्कृष्टतमां जातिं प्राप्य, आत्मनैवेदृशं कर्म कृतम्, येन तिर्यग्योनौ पतितः, स किमपरं विचारयसि ? प्रथममेवात्मा न विवेके स्थापितः । अधुना स्वकर्मोपात्तजातिसदृशमाचरतस्ते नास्त्येव दोषः । येषां च भक्ष्याभक्ष्यनियमोऽस्ति, तेषामप्यापत्काले प्राणानां संधारणमभक्ष्योपयोगेनापि तावद्विहितम् । किं पुनस्त्वादृशस्य ? तत्किमर्थमात्मानं क्षुधा पिपासया वा घातयसि ! यन्न भक्षयस्यमूनि मुनिजनोचितानि वनफलानि न पिबसि वा पानीयम् ? (16)

(*b*) Render freely into Sanskrit :—

1 I shall expose myself to ridicule, if, being dull-witted, I aspire after the fame of a poet.

2 What pleasure can we derive by slaying these ? We shall incur nothing but sin, by killing these desperadoes. (6)

II. (*a*) Distinguish between वामेतरम् and वामेतरत् both adjectival to लोचनम्. (2)

(*b*) What is the difference of sense between राजवता and राजन्वती ? (2)

(*c*) Re-write the following by changing the voice:—

१ मया द्रोणाद्धनुर्वेदोऽधीतः, २ राजा दुर्योधनो मे सखा. ३ शाधि मां तस्याधिगमोपायम् and ४ कर्णो महेन्द्रं पर्वतमयासीत्. (4)

III. (*a*) Translate into English :—

रावणः— शङ्कुकर्ण, गच्छ, बिभीषणं तावदाह्वय । (विचिन्त्य) भोः कष्टम् ।
अचिन्त्या मनसा लङ्का सहितैः सुरदानवैः ।
अभिभूय दशग्रीवं प्रविष्टः किल वानरः ॥ १ ॥

बिभीषणः—(प्रविश्य स्वगतम्) अहो नु खलु महाराजस्य विपरीता खलु बुद्धिः संवृत्ता । कुतः—
मयोक्तो मैथिली रामे बहुशो दीयतामिति ।
न मे शृणोति वचनं सुहृदां शोककारणात् ॥ २ ॥
(उपेत्य) जयतु महाराजः ।

रावणः— बिभीषण, निर्विषण्णमिव त्वां लक्षये ।

बिभीषणः—निर्वेद एव खलु अनुकम्पाग्राहिणं स्वामिनमुपाश्रितस्य भृत्यजनस्य भागधेयम् ।

रावणः— छिद्यतामेषा कथा । कथ्यतां त्वया, अशोकवनिकाभङ्गकृद्वानरः कथं निवार्यताम् ?
(ततः प्रविशति राक्षसैर्गृहीतो हनूमान्)

हनूमान् — नैवाहं धर्षितस्तेन रक्षसा बलभिज्जिता ।
स्वयं ग्रहणमापन्नो राक्षसेन्द्रदिदृक्षया ॥ ३ ॥ (12)

(*b*) Dissolve and name the compounds occurring in the stanza of the above passage.

(*c*) Re-write, by changing the voice, the sentence

बिभीषणं तावदाह्वय.

(*d*) Write a note on the derivation of the word भागधेयम्. (9)

IV. (1) Give (*a*) the Genitive singular and plural of नृ, सुरभि *adj*., सुधी (learned), and पथिन्.

(*b*) The Nominative dual and Accusative plural of विंशत् *n*., अक्षि, युवन् and स्त्री. (8)

(2) Give (*a*) the third person, plural, Present of इ, सृज्, तक्ष् and दंश्.

(*b*) the second person, singular, of the Perfect of गाहू, नू, नश् and स्वप्.

(c) the past participles of वे, अंचु, मे, विज् and पू.

(*d*) the Present Participles of रुध्, कम् (passive), अस् and इ. (9)

V. (*a*) Translate into Sanskrit:—

At that very moment Hârīta the son of a great sage, who dwelt in the neighbouring hermitage, came to bathe in the lake. He saw me, had compassion on me, and bade his companions take me to the shore of the lake. With his own hands he poured a few drops of water into my mouth and so brought life back to me. Having bathed and duly worshipped the setting sun, he bore me to his father's peaceful hermitage. There was seen the holy sage sitting with his disciples at the foot of a red-flowered Ashoka tree. As I mused on the holy peace that seemed to reign even in the hearts of insensate beings in the happy hermitage, Harita embracing the feet of his father, sat himself down at some little distance and all the sages turned their eyes on me.

(*b*) Translate into English:—

१ सितारविन्दप्रचयेषु लीनाः
संसक्तफेनेषु च सैकतेषु ।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः ॥ १ ॥

२ उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ १ ॥

२ अमन्थि मुरवैरिणा पुनरमायि मर्यादया
अहावि मुनिना सुखे वशमनायि लङ्कारिणा ।
अलङ्घि कपिनाप्यसौ सुखमतारि शाखामृगैः
क्व नाम वसुधापते तव यशोनिधिः क्वाम्बुधिः ॥ १ ॥ (९)

(c) Give the third person, singular, passive, of the Present of the roots contained in the verbs of the last stanza above (3)

Group XLIX.

I. (a) Translate into English:—

राजा— (तत्कालप्रविष्टं यज्ञोपवीतबद्धाङ्गुष्ठं संभ्रान्तं विदूषकं प्रति)
किमिति संभ्रान्तो भवान् ?

विदूषकः— परित्रायतां परित्रायतां भवान् । सर्पेणास्मि दष्टः ।

राजा— कष्टं कष्टम् । क्व भवान्परिभ्रान्तः ?

विदूषकः— देवीं द्रक्ष्यामीति आचारपुष्पग्रहणकारणात्प्रमदवनं गतोऽस्मि ।

देवी— हा धिक्, हा धिक् । अहमेव ब्राह्मणस्य जीवितसंशयनिमित्तं जातास्मि ।

विदूषकः— तस्मिन्नशोकस्तबककारणात्प्रसारिते दक्षिणहस्ते कोटरनिर्गतेन सर्परूपेण कालेन दष्टोऽस्मि । नन्वेते द्वे दन्तपदे (इति दंशं दर्शयति)

परिव्राजिका—तेन हि दंशच्छेदः पूर्वकर्मेति श्रूयते । स तावदस्य क्रियताम् ।
छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम् ।
एतानि दष्टमात्राणामायुष्याः प्रतिपत्तयः ॥ १ ॥

राजा— संप्रति विषवैद्यानां कर्म । जयसेने, ध्रुवसिद्धिः क्षिप्रमानीयताम् ।

(निष्क्रान्ता जयसेना)

विदूषकः —अहो ! पापेन मृत्युना गृहीतोऽस्मि ।

राजा— मा कातरो भूः । अविषोऽपि कदाचिदंशो भवेत् ।

विदूषकः— कथं न भेष्यामि । सिमसिमायन्ति मेऽङ्गानि ।

देवी— दर्शितमशुभं विकारेण । अवलम्बध्वं ब्राह्मणम् ।

विदूषकः— भो भवतो बाल्यादपि प्रियवयस्योऽहम् । तद्विचार्य अपुत्राया मे जनन्या योगक्षेमं वह । देवि । जीवेयं वा न वा । यन्मयात्रभवन्तं सेवमानेन तेऽपराद्धं तन्मृष्यस्व ।

देवी— दीर्घायुर्भव ! **(20)**

(*b*) **Translate into English:—**

१ अलमेष विलोकितः प्रजानां सहसा संहतिमंहसां विहन्तुम् ।
वनवर्त्म सहस्रधेव कुर्वन्हिमगौरैरचलाधिपः शिरोभिः ॥ १ ॥

२ परैः प्रोक्ता गुणा यस्य निर्गुणोऽपि गुणी भवेत् ।
इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः ॥ १ ॥

३ जनकेन समादिष्टाः सचिवाः प्राविशन्पुरम् ।
तद्धनुः पुरतः कृत्वा निर्जग्मुरमितौजसः ॥ १ ॥

नृणां शतानि पञ्चाशद्व्यायतानां महात्मनाम् ।
मञ्जूषामष्टचक्रां तां समूहुस्ते कथंचन ॥ २ ॥

तामादाय सुमञ्जूषमायासीं यत्र तद्धनुः ।
सुरोपमं ते जनकमूचुर्नृपतिमान्त्रिणः ॥ ३ ॥

इदं धनुर्वरं राजन्पूजितं सर्वराजभिः ॥
मिथिलाधिप राजेन्द्र दर्शनीयं यदीच्छसि ॥ ४ ॥

II (1) Decline (*a*) अम्बा, वस्तु, ज्योतिस् and सत् *m.*, in the Vocative singular and Locative plural.

(*b*) प्रथम, मथिन्, सम्राज and प्रत्यञ्च् *m.*, in the Nominative plural and Ablative singular.

(2) Give (*a*) The third person, sing. and plural, Imperative, of दुह्, भिद्, and प्रच्छ्.

(*b*) The second, person singular, Perfect, of अस् (2nd conj.) हन्, ग्रह् and भृ.

(*c*) The past participles of खन्, भ्रस्ज्, स्तृ and रञ्ज्.

(*d*) Third person singular, Perfect, of the causal of जि, पा, प्रति + इ, and ऋ.

III. Translate into English:-- (11)

अथ ते यक्षा ब्राह्मणवर्णमात्मानमभिनिमाय समनुचरन्तो ददृशुः प्रत्यरण्यचरमन्यतमं गोपालकं छायाद्रुममूले सोपानत्कं संनिषण्णम् । समुपेत्य चैनमूचुः । भो गवां संरक्षाधिकृत एवं विविक्ते निर्जनसंपातेऽस्मिन्नरण्ये विचरन्नेकाकी कथं न बिभेषि । स तानालोक्योवाच । कुतो वा भेतव्यम् । यक्षा ऊचुः । किं त्वया न श्रुतपूर्वा यक्षराक्षसानां निसर्गरौद्रा प्रकृतिरिति । तदा स गोपालकः प्रहस्यैनानुवाच । स्यादेवमन्यत्र । अत्र त्वास्ति नः स्वस्त्ययनविशेषो यदस्माकमप्रधर्षणीयप्रभावो राजा सर्वात्मना प्रजाहितेऽप्रमत्तो जागर्ति । तेन न प्रसहन्तेऽस्य विषयवासिनं जनं हिंसितुमुपद्रवाः । यक्षाः प्रोचुः किंकृतोऽयमस्य राज्ञः प्रभावः । गोपालक उवाच । स्वप्रयत्नाधिगतोऽयं प्रभावो महाराजस्य । यतः प्रजानुराग एव तस्य बलमन्यत्तु राज्यालङ्कार एव । स नो रुषं वेत्ति परुषं च न भाषते । प्रतिश्रुतं सम्यग्रक्षति । धर्म एव तस्य चक्षुः । सत्पुरुषपूजार्थमेवार्थसंचयः । अपरं चैवमाश्चर्यपरंपरामयोऽपि दुर्जनधनं गर्वं स न समालम्बते ।

(*b*) **Translate freely into Sanskrit:—**

1 **My intellect is too poor to do justice to the solar race of kings.**

2 **I can see nothing that would drive away this anguish that withers up my senses, even though I should attain unrivalled and prosperous monarchy on earth, or even the sovereignty of gods.** (7)

(*c*) Dissolve and name the following compounds:— छायाद्रुमः, निर्जनसंपातम्, श्रुतपूर्वा, किंकृतः, सत्पुरुषपूजार्थम्, and दुर्जनधनम्.

IV. **Translate into Sanskrit:—**

One hot night in the moonlight, after going many miles in search of food, a thirsty fox came to a vine-yard full of

vines. "Aha ! " thought he "now I shall have a nice meal, I am glad I came as far as this ". The grapes were high up in the air, out of reach of the fox. He jumped up and tried to reach them, but could not. He jumped again and again. He jumped twenty times, but could not reach the grapes, they were too high. When the fox saw that it was of no use to try to get the grapes, he said, " Perhaps, after all, the grapes are not ripe. They look sour. So I will not jump any more. " He said this because he could not get them. So when a man cannot get something he wants, and pretends that he does not care, we say,

" The grapes are sour "

Group L.

GENERAL QUESTIONS.

1. State and illustrate the general principle underlying the consonantal संधिs.

2. State, with examples, what is meant by the following terms:—

गुण, वृद्धि, ह्रस्व, दीर्घ, गुरु, लघु, प्लुत, प्रगृह्य, संयोग, अक्षर, प्रयोज्य, प्रयोजक, पद, कारक, कृदन्त, तद्धितान्त, a finite verb, active, passive, impersonal, and participle.

3. State and illustrate the occasions where two contiguous vowels are not combined.

4. State, with examples, the several forms that a nasal assumes in writing.

5 State, with examples, the several modifications of a विसर्ग.

6. Name and exemplify the more important affixes implying 'possession'.

7. Distinguish a समास from a तद्धितान्त.

8. Exemplify the following varieties of compounds:—

नित्यसमास, अलुक्, प्रादि, उत्तरपदलोपिन् तत्पुरुष, मध्यमपद-लोपिन्, बहुव्रीहि, कालपरिमाणिन् समास, एकदेशिन् समास, राज-दन्तादि, कृदन्त तत्पुरुष, गतिसमास.

9. Illustrate the varieties of कर्मधारय.

10. State what case-forms of a declinable are always identical.

11. Enumerate the tenses and moods in Sanskrit, and state in brief their uses.

12. Distinguish between the uses of the three past tenses in Sanskrit.

13. Compare the uses of the potential and of the conditional.

14. State how a verb of the present can obviate the use of a verb of the past and of the future.

15. Distinguish between a कर्मधारय and a बहुव्रीहि.

16. Distinguish between the compounds वृक्षोपरि and अधि-वृक्षम्.

17. Illustrate the uses of the past participles ending in त and in तवत्.

18. Why is the temporal augment अ changed to आ in the case of स्वरादि roots ?

19. What participles serve as predicates ?

20. Name the compound tenses, if there be any, in Sanskrit.

21. What are the general properties of a weak affix ?

22. State in detail how a radical vowel is affected by strong terminations.

23. Enumerate the participles in Sanskrit, and briefly state their uses.

24. Compare the names of *persons* in English and in Sanskrit, and opine on their comparative merits.

25. Classify roots among the *set* and the *anit*, in a tabular form.

26. Enumerate the conjugtions of roots in Sanskrit, and state their peculiarities.

27. In what verbal or case forms do you find (long) ॠ in Sanskrit literature ?

28. Bear out the statement–'the long ॠ found in roots is merely a grammatical device.'

29. What letters can end a पद् or complete word ?

30. Compare the behaviours of the विसर्गs coming from स् and from र्.

31. Distinguish between the आभ्यन्तर or internal and the बाह्य or external संधि.

32. State the occasions where the nasal preceding a consonant may be and must be expressed by an अनुस्वार respectively

33. With which–स्वरs or व्यञ्जनs–will you classify the अनुस्वार and the विसर्ग, any why ?

34. What are the compound vowels, and why are they so called ?

35. State all the ways in which long sums are expressed in Sanskrit.

36. Compare the degrees of comparison and those of eminence, in Sanskrit.

37. Enumerate a few declinables whose case-forms show no difference of gender.

